ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ /1220/583/ છ, તા. 29/08/2020 - થી મંજૂર

# अनिवार्यसंस्कृतम् ( काव्यम् )

## प्रथमा २

(ધોરણ 10)

**प्रतिज्ञापत्रम्**

भारतं मम देशः ।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति ।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि ।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि ।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि ।
प्रत्येकेन सह शिष्टव्यवहारं च करिष्यामि ।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि ।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति ।

**मूल्यम् : ₹ 25.00**

तमसो मा ज्योतिर्गमय
**गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्**
**'विद्यायनम्', सेक्टर 10-ए, गान्धीनगरम्-382 010**

© गुजरात राज्य शाला पाठ्यपुस्तक मण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यशालापाठ्यपुस्तकमण्डलाधीनाः सन्ति।
अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रूपेण गुजरातराज्य-शालापाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषयमार्गदर्शनम्**

श्री हेमेन्द्रकुमार दवे

**लेखनम्**

श्री परागभाई जोषी (कन्वीनर)
श्री जयदीपकुमार दवे
श्री राजेशकुमार ठाकर
श्री नरेशभाई जोषी
श्री अजयभाई उपाध्याय

**समीक्षणम्**

डॉ. कमलेशकुमार चोक्सी
डॉ. अमृतलाल भोगायता
श्री जीगर भट्ट

**भाषाशुद्धि**

डॉ. अमृतलाल भोगायता

**संयोजनम्**

डॉ. क्रिष्ना दवे
(विषयसंयोजक : अंग्रेजी)

**निर्माणायोजनम्**

श्री हरेन शाह
(उपनियामक : शैक्षणिकः)

**मुद्रणायोजनम्**

श्री हरेश एस. लीम्बाचीया
(उपनियामक : उत्पादनम्)

## प्रस्तावना

प्राच्यगुरुकुल-परम्परानुसारम् अभ्यासं कुर्वतः संस्कृतपाठशालीय-विद्यार्थिनः लक्षीकृत्य प्राचीनार्वाचीनोभयपद्धत्योः सरस-सरलसमन्वयपूर्वकं गुजरातराज्यमाध्यमिकोच्चतरमाध्यमिकशिक्षणबोर्डद्वारा अभ्यासक्रमसंरचना जाताऽस्ति, एते अभ्यासक्रमाः गुजरातसर्वकारद्वारा मानिताः प्रमाणीकृताश्च सन्ति।

गुजरातसर्वकारप्रमाणितस्य **अनिवार्यसंस्कृतम् (काव्यम्) प्रथमा २ (धो२ण 10)** इति विषयस्य संवर्द्धिताभ्यासक्रमानुसारं सज्जीभूतस्य पाठ्यपुस्तकस्य संवर्द्धितामावृत्तिं विद्यार्थिसमक्षं प्रस्तुवन्मण्डलम् आनन्दमनुभवति। अस्याः पाठ्यपुस्तकसंवर्द्धितावृत्तेः प्रकाशनात्प्राक् हस्तलिपीनां शिक्षणकार्यं कुर्वद्भिः शिक्षकैः तज्ज्ञैश्च सर्वाङ्गिसमीक्षणं कृतमस्ति। शिक्षकतज्ज्ञानानां सूचनानुसारं हस्तलिपिषु योग्यां शुद्धिं कृत्वा पाठ्यपुस्तकमिदं प्राकाश्यं नीतमस्ति।

प्रस्तुतं पाठ्यपुस्तकं सरसम् उपयोगि क्षतिरहितं कर्तुं मण्डलं सश्रद्धं प्रायतत। तथापि शिक्षणरसिकेभ्यः पाठ्यपुस्तकस्य गुणवत्तावहाः सूचनाः स्वीकार्याः सन्ति।

**पी. भारती (IAS)**
नियामकः — कार्यवाहकप्रमुखः
ता. 26-10-2020 — गान्धीनगरम्

प्रथमावृत्ति : 2020

**प्रकाशकः** – गुजरात राज्य शाला पाठ्यपुस्तक मण्डल, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन, पी. भारती, नियामकः

**मुद्रकः** –

# मूलभूतकर्तव्यानि

प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः।*

(क) संविधानं प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रगीतस्य चादरः।

(ख) स्वातन्त्र्याय अस्मदीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम्, अनुसरणं च।

(ग) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं तद्रक्षणं च।

(घ) देशस्य रक्षणं राष्ट्रीयसेवायै उद्घोषणायां जातायां तदनुसरणं च।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः पृथक् स्थित्वा, समस्तभारतीयेषु साम्मनस्य-समानबन्धुत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तद्रक्षणम्।

(ज) वनानां तडागानां नदीनाम् रक्षणम् अन्यवन्यपशुपक्षिसहितं प्राकृतिक-पर्यावरणरक्षणं तत्संशोधनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

(झ) वैज्ञानिकमानसस्य मानवतावादस्य जिज्ञासयाः संशोधनस्य च भावनाबोधः।

(ट) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावुकेन षट्वर्षतः चतुर्दशवर्षं यावत् (6 तः 14) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

* भारतीयं संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| १. | वैदिकस्तवनम् | 1 |
| २. | रोचते यदि मे सख्यम् | 5 |
| ३. | त्रैविध्यम् | 10 |
| ४. | विशेषको यावदयं न शुष्कः | 14 |
| ५. | अजविलापः | 19 |
| ६. | अन्योक्तयः | 24 |
| ७. | दत्तात्रेयस्य गुरवः | 29 |
| ८. | किञ्चिद् हसामः | 35 |
| ९. | सूक्तयः | 39 |
| १०. | गुरोरनुशासनम् | 42 |
| ११. | यमनचिकेतसोः संवादः | 46 |
| १२. | कस्येयं भार्या भवितुमर्हति | 52 |
| १३. | कपिञ्जलकृतोपदेशः | 55 |
| १४. | दानस्य फलमुत्तमम् | 58 |
| १५. | गुरुशिष्ययोः संवादः | 62 |
| १६. | लौकिकन्यायाः | 65 |
| १७. | छन्दांसि | 69 |
| १८. | पत्रलेखनम् | 73 |



●

# १

# वैदिकस्तवनम्

**प्रस्तावना**

अस्माकं भारतदेशः जगद्गुरुरूपेण नितरां राराज्यते। अस्मिन् भारते ज्ञानचक्षुषाम् ऋषीणां तपोबलेन अपौरुषेयाः वेदाः आविर्भूताः। वेदानां ज्ञानविज्ञानगहनता उपनिषत्सु सरलीकृता वर्तते। उपनिषद्यते प्राप्यते ब्रह्मविद्या अनया इति उपनिषद्। यस्यां ब्रह्मविषयकम् अध्यात्मज्ञानम् ऋषिभिः सरलसूत्रैः प्रतिपादितम् अस्ति। कविचेतसाम् ऋषीणामाध्यात्मिकं काव्यमुपनिषद् वर्तते।



ईश-केन-कठ-प्रश्न-मुण्ड-माण्डुक्य-तैत्तिरीय-ऐतरेय-छान्दोग्यबृहदारण्यकेति दशोपनिषदः प्रमुखाः सन्ति। (उप + नि + सद् + क्विप्) ये जनाः ब्रह्मविद्यामुपयान्ति तेषां क्लेशादिकं निशातयति वा परब्रह्म गमयति इति। आत्मज्ञानस्य सुधावर्षा उपनिषदां ज्ञानेन अभ्यासेन च भवति तज्ज्ञानेन वैदिकस्तवनेन च छात्राः श्रुतिमातरं प्रसाद्य सुधावर्षास्नाताः भवेयुः इति भावः।

1. **ॐसह नाववतु । सह नौ भुनक्तु। सह वीर्यं करवावहै।**
   **तेजस्वि नावधीतमस्तु। मा विद्विषावहै ॥ 1 ॥**

   **अन्वयः** - सह नौ अवतु। सह नौ भुनक्तु। सह वीर्यं करवावहै ।
   नौ अधीतं तेजस्वि अस्तु। मा विद्विषावहै।

   **भावार्थः** - गुरुशिष्यौ प्रार्थनां कुरुतः हे परमात्मन् ! आवयोः सह एव रक्षां करोतु। आवयोः सह एव पालनं करोतु । आवां बलवत्तराणि कर्माणि करवावहै। आवयोः यदधीतं श्रौतस्मार्तादि तत् तेजोमयं भवतु। कदापि आवां परस्परं मनसा वाचा कर्मणा वा द्वेषभावनां न कुर्वः।

2. **हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।**
**तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥3॥**

**अन्वयः** - हिरण्मयेन पात्रेण सत्यस्य मुखम् अपिहितम् अस्ति।
पूषन् तत् सत्य - धर्माय दृष्टये त्वम् अपावृणु।

**भावार्थः** - सत्यस्य मुखं हिरण्मयेन धनलोभात्मकपात्रेण आच्छादितमस्ति। हे पूषन्! हे सूर्य! त्वं तत् पात्रं सत्यधर्मस्य दर्शनाय अनावृतं कुरु।

3. **उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।**
**क्षुरस्य धारा निशिता दुरत्यया**
**दुर्गं पथस्तत् कवयो वदन्ति ॥3॥**

**अन्वयः** - उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत। क्षुरस्य निशिता धारा दुरत्यया दुर्गं तत् पथः (इति) कवयः वदन्ति।

**भावार्थः** - हे जनाः! उत्तिष्ठत, आलस्यं त्यक्त्वा प्रवृत्ता भवत । मोहनिद्रां त्यक्त्वा कर्मनिष्ठा भवत । श्रेष्ठान् ज्ञाननिष्ठान् संप्राप्य ज्ञानं लभध्वम्। कारणं यथा क्षुरस्य धारा सुतीक्ष्णा भवति तथैव आध्यात्मज्ञानस्य मार्गोऽपि दुर्गमः अस्ति ।

4. **अरा इव रथनाभौ संहता यत्र नाड्यः स**
**एषोऽन्तश्चरते बहुधा जायमानः।**
**ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः**
**पाराय तमसः परस्तात् ॥ 4॥**

**अन्वयः** - रथनाभौ अराः इव यत्र नाड्यः संहता बहुधा जायमानः स एषः आत्मा अन्तः चरते आत्मानम् ॐइति एवं ध्यायथ वः तमसः परस्तात् पाराय स्वस्ति।

**भावार्थः** - अस्मिन् मन्त्रे आत्मतत्त्वं प्रणवात्मकं प्रतिपादयन् ऋषिः कथयति यत् यथा रथस्य चक्रस्य नाभौ अराः सम्मिलिताः भवन्ति। स एषः आत्मा जीवात्मनः अन्तश्चरति। स (आत्मा) एव अनेकरूपैः आविर्भवति। तम् आत्मानं प्रणवरूपेण ॐकारेण ध्यानस्थं कुरुत। येन अज्ञानतमसः पारं गन्तुं सर्वेषां मार्गः कल्याणमयः भवतु।

5. **प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।**
**अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवेत्॥ 5॥**

**अन्वयः** - प्रणवः धनुः शरः हि आत्मा ब्रह्म तल्लक्ष्यम् उच्यते।
अप्रमत्तेन तत् लक्ष्यं वेद्धव्यं शरवत् तन्मयः भवेत्।

**भावार्थः** - ॐकारः (प्रणवः) धनुः अस्ति। आत्मा बाणरूपेण वर्तते। ब्रह्म स्वयं लक्ष्यं कथितमस्ति। प्रमादरहितेन एकाग्रचेतसा लक्ष्यं वेद्धव्यम्। यथा बाणः स्वलक्ष्ये विलीनो भवति तथैव ब्रह्मणि आत्मना तन्मयेन भवितव्यम्।

6. **यस्य देवे पराभक्तिः यथा देवे तथा गुरौ।**
**तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥ 6॥**

**अन्वयः** - यस्य देवे परा भक्तिः यथा देवे तथा गुरौ, तस्य हि महात्मनः कथिता एते हि अर्थाः प्रकाशन्ते।

**भावार्थः** – यस्य जिज्ञासोः ईश्वरे परमा प्रेमरूपा भक्तिः विद्यते एवं यथा ईश्वरे परमा भक्तिः तथैव गुरौ यस्य भक्तिः विद्यते, तस्य महात्मनः ईश्वरात्मकगुरुनिष्ठस्य ये विषयाः ग्रन्थाः कथ्यन्ते, ते विषयाः स्वयमेव स्वार्थान् प्रकटयन्ति, स्वयं तस्य पुरः स्वात्मस्वरूपं प्रकटयन्ति, न हि गुर्वीश्वरयोः भेददृष्टेः।

7. **यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह।**
**आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चनेति।**
**एतं ह वाव न तपति। किमहं साधु नाकरवम्।**
**किमहं पापमकरवमिति। स एवं विद्वानेते**
**आत्मानं स्पृणुते। उभे ह्येवैष एते आत्मानं**
**स्पृणुते। य एवं वेद। इत्युपनिषद् ॥ 7॥**

**अन्वयः** – यतः वाचः अप्राप्य मनसा सह निवर्तन्ते। ब्रह्मणः आनन्दं विद्वान् कुतश्चन न बिभेति। एतं ह वाव न तपति। अहं किं साधु नाकरवम् अहं किं पापमकरवम् इति। सः यः एवं किं विद्वान् एते उभे आत्मानं स्पृणुते। यः एवं वेद एषः आत्मानं स्पृणुते इति उपनिषद्।

**भावार्थः** – अस्मिन् मंत्रे ब्रह्मानन्दस्य महत्त्वं प्रतिपादितमस्ति। यतः आनन्दात् वाचः सकलमपि वाङ्मयं मनसा सह प्राप्तिं विना एव विनिर्वतन्ते। ब्रह्मणः आनन्दं वाणी एवं मनः न जानीतः। यः ब्रह्मानन्दं वेत्ति सः कुत्रापि कस्मादपि न बिभेति। सः कदापि संतापं न करोति। किं मया साधु न कृतं वा किं वा मया पापं कृतम् इति न चिन्तयति। शुभाशुभाभ्यां विनिर्मुक्तः सः नित्यब्रह्मविद् आत्मानम् अपि तथैव जानाति इत्थं भूतो यो ब्रह्म जानाति सः मुक्तो भवति इयम् उपनिषद्।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| **वीर्यम्** | = बलम् | **हिरणमयेन** | = सुवर्णेन | **कवयः** | = विद्वांसः |
| **दुर्गम्** | = कठिनम् | **निशिता** | = तीक्ष्णा | **स्वस्ति** | = कल्याणम् |
| **पाराय** | = उत्तीर्णहेतवे | **प्रणवः** | = ॐकारः | **ब्रह्म** | = परमात्मा |
| **वेद्धव्यम्** | = भेत्तव्यम् | **शरवत्** | = बाणवत् | **महात्मनः** | = ज्ञानिनः |
| **वाचः** | = गिरः | | | | |

## स्वाध्यायः

1. **कोष्ठकप्रदत्तविकल्पेभ्यः योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयत।**
(1) तेजस्वि नौ ...... अस्तु। (भुक्तम्, वीर्यम्, अधीतम्)
(2) सत्यस्य मुखं ...... पात्रेण अपिहितमस्ति। (हिरण्यमयेन, रजतेन, तमसा)
(3) ...... शरो विद्यते। (प्रणवः, ब्रह्म, आत्मा)
(4) रथनाभौ ...... संहताः। (नाड्यः, अराः, ॐकारः)
(5) ...... न बिभेति कुतश्चन। (विद्वान्, ब्रह्मानन्दविद्, आनन्दः)
(6) अप्रमत्तेन ...... वेद्धव्यम्। (लक्ष्यं, धनुः, शरः)
(7) यथा ...... तथा ......। (गुरौ देवे, देवे गुरौ, ईश्वरे महात्मनि)
(8) किमहं ...... नाकरवम्। (साधु, असाधु, पापम्)

2. **एकैकवाक्येन उत्तरं लिखत।**
(1) आवां कदापि किं न करवावहै ?
(2) कः अन्तः चरते ?
(3) कवयः किं दुर्गं वदन्ति ?
(4) कस्य अर्थाः प्रकाशन्ते ?
(5) वाचः कुतो निवर्तन्ते ?

**3. द्वित्रिवाक्यैः उत्तरं लिखत।**

(1) तमसः पाराय आत्मा कथं ध्येयः?

(2) पथः केन तुल्यं दुर्गम् अस्ति?

(3) विद्वान् किं कृत्वा न तपति?

**4. सविस्तरमुत्तरं लिखत।**

(1) ''यस्य देवे परा भक्तिः'' इति मंत्रस्य कः मुख्यभावः?

(2) आत्मा कथं ध्येयः?

(3) हिरण्मयेन इत्यस्य भावं स्पष्टं कुरुत।

**5. प्रदत्तसूचनानुसारं कुरुत।**

**(क) अ विभागं ब विभागेन सह योजयत।**

| अ | | ब |
|---|---|---|
| (1) उत्तिष्ठत | - | लक्ष्यम् |
| (2) धारा | - | पथः |
| (3) शरवत् | - | निशिता |
| (4) प्रणवः | - | जाग्रत |
| (5) दुर्गम् | - | तन्मयः |
| (6) ब्रह्म | - | धनुः |

**(ख) विभक्तिपरिचयो देयः।**

| | | |
|---|---|---|
| (1) नौ | (2) दुर्गम् | (3) वः |
| (4) धनुः | (5) महात्मनः | (6) तमसः |

**(ग) सन्धिविच्छेदं कुरुत।**

| | | |
|---|---|---|
| (1) नावधीतम् | (2) एषोऽन्तश्चरते | (3) तल्लक्ष्यम् |
| (4) ह्येवैषः | (5) कस्यैते | (6) वाङ्मयम् |

**(घ) सन्धिं कुरुत।**

| | | |
|---|---|---|
| (1) यत् + अधीतम् | (2) हि + आत्मा | (3) तत् + मयः |
| (4) न + अकरवम् | (5) कस्माद् + अपि | (6) उत् + तिष्ठत |

**(ङ) धातुपरिचयो देयः**

| | | |
|---|---|---|
| (1) लभावहै | (2) निबोधत | (3) ध्यायथ |
| (4) उच्यते | (5) बिभेति | (6) तपति |

**छात्रप्रवृत्तिः**

मन्त्राणां सुस्वरेण गानं कुरुत।

**अध्यापकप्रवृत्तिः**

उपनिषदां महत्त्वं ज्ञानं विज्ञानं च बोधयत।

●

# २

# रोचते यदि मे सख्यम्

**प्रस्तावना**

लौकिकसंस्कृतसाहित्यस्य प्रादुर्भाव: महर्षिवाल्मीकिविरचितरामायणमहाकाव्याद् मन्यते, एतदर्थं महर्षि: वाल्मीकि: आदिकवि: मन्यते। रामायणमहाकाव्यम् अस्य भूतलस्य प्रथमं महाकाव्यमस्ति। अस्मिन् महाकाव्ये चतुर्विंशतिसहस्रश्लोका: सन्ति। गायत्रीमन्त्रस्थितान् चतुर्विंशतिवर्णान् आदाय अस्य रचना सञ्जाता इति मन्यते।

वाल्मीकिरामायणे रामस्य कथा वर्णिताऽस्ति। रामायणे विविधमानवीयगुणानां मनोभावस्य उदात्तरूपं समाविष्टं वर्तते।

अस्मिन् महाकाव्ये छन्दोविधानस्य,, अलङ्कारचमत्कारस्य, भाषासौष्ठवस्य, रसपरिपाकस्य च अद्वितीय: समावेश: वर्तते। अयं पाठ: वाल्मीकिरामायणस्य किष्किन्धाकाण्डस्य पञ्चमसर्गत: संगृहीतोऽस्ति। अस्मिन् सर्गे रामसुग्रीवयो: मैत्र्या: वर्णनम् अस्ति। हनुमान् मलयगिरिं गत्वा भीताय सुग्रीवाय रामलक्ष्मणयो: परचियं यच्छति। इक्ष्वाकुकुलजात: राम: पितु: आज्ञापालक: वर्तते। अरण्ये निवसत: तस्य रामस्य भार्या रावणेनापहृता। स: राम: भवच्छरणमागत:। रामलक्ष्मणौ सुग्रीवेण सह सख्यकामौ। एतत् श्रुत्वा सुग्रीव: मानुषं रूपं धृत्वा अवदत् प्रभो! वानरेण सह यत् त्वं स्नेहमिच्छसि, तत् ममैव सत्कार: उत्तमो लाभश्च। तुभ्यं यदि मे सख्यं रोचते तर्हि एष: बाहु: प्रसारित:। तदनन्तरं रामसुग्रीवयो: मैत्री सञ्जाता।

***अवधेयांश:** पाठेऽस्मिन् अन्वयार्थसौकर्याय वाल्मीकिरामायणस्य मूलश्लोकक्रमे यथास्थानं यथावश्यकं चरणव्यत्यासादि परिवर्तनं कृतम् अस्ति।

---

**1. भवान् धर्मविनीत: सुतपा: सर्ववत्सल: ।**
**आख्याता वायुपुत्रेण तत्त्वतो मे भवद्गुणा:॥1॥**

**अन्वय:** –भवान् धर्मविनीत: सुतपा: सर्ववत्सल: च (अस्ति), (अत: इमे पूर्वोक्ता:) भवद्गुणा: वायुपुत्रेण मे तत्त्वत: आख्याता:।

**भावार्थ:** – सुग्रीव: कथयति यत् हे राम! भवान् धर्मविनीत: सर्ववत्सल: सुतपा: च एते भवद्गुणा: हनुमता विस्तरत: मह्यम् आख्याता वर्तन्ते।

**2. तन्ममैवैष सत्कारो लाभश्चैवोत्तम: प्रभो।**
**यत्वमिच्छसि सौहार्दं वानरेण मया सह॥2॥**

**अन्वय:** –प्रभो यत् त्वं मया वानरेण सह सौहार्दम् इच्छसि तत् एष: मम एव उत्तम: सत्कार: लाभश्च (अस्ति)।

**भावार्थ:** – सुग्रीव: वदति हे प्रभो! त्वं यत् मया वानरेण सह मैत्रीम् इच्छसि। यदि भवत्सदृशं मित्रं प्राप्नुयां चेत् एष: ममैव सत्कार: लाभश्च वर्तते।

**3. रोचते यदि मे सख्यं बाहुरेष प्रसारित:।**
**गृह्यतां पाणिना पाणिर्मर्यादा बध्यतां ध्रुवा॥3॥**

**अन्वय:** –यदि मे सख्यं रोचते (तर्हि) एष: बाहु: प्रसारित: (अस्ति) पाणिना पाणि: गृह्यतां ध्रुवा मर्यादा बध्यताम्(च)।

**भावार्थ:** – हे राम! तुभ्यं यदि मे संख्यं रोचते तर्हि मया एष: बाहु: प्रसारित:। तव हस्तेन मम हस्त: गृह्यतां तथा अचला मर्यादा बध्यताम्।

4. **एतत्तु वचनं श्रुत्वा सुग्रीवस्य सुभाषितम्।**

**संप्रहृष्टमना हस्तं पीडयामास पाणिना॥4॥**

**हृद्यं सौहृदमालम्ब्य पर्यष्वजत पीडितम्।**

**अन्वयः** - सुग्रीवस्य तु एतत् सुभाषितं वचनं श्रुत्वा संप्रहृष्टमनाः (रामः) पाणिना हस्तं पीडयामास हृद्यं सौहृदम् आलम्ब्य पीडितं पर्यष्वजत।

**भावार्थः** - सुग्रीवस्य एतत् मधुरवचनं श्रुत्वा प्रसन्नचित्तः रामः स्वहस्तेन सुग्रीवहस्तं स्वीचकार। एवं च प्रियं मैत्रीभावं प्राप्य रामः सुग्रीवम् आलिङ्गितवान्।

5. **ततो हनुमान् संत्यज्य भिक्षुरूपमरिन्दमः।**

**काष्ठयोः स्वेन रूपेण जनयामास पावकम्॥5॥**

**अन्वयः** -ततः अरिन्दमः हनुमान् भिक्षुरूपं संत्यज्य स्वेन रूपेण

काष्ठयोः पावकं जनयामास।

**भावार्थः** - अनन्तरम् अरिमर्दनः हनुमान् संन्यासिरूपं त्यक्त्वा स्वकीयरूपं गृहीत्वा रामसुग्रीवयोः मैत्रीभावं अग्निसाक्षिकं कर्तुम् अरणिकाष्ठयोः घर्षणेन अग्नेः प्रज्वालनं कृतवान्।

6. **दीप्यमानं ततो वह्निं पुष्पैरभ्यर्च्य सत्कृतम् ।**

**तयोर्मध्ये तु सुप्रीतो निदधे सुसमाहितः॥6॥**

**अन्वयः** -ततः सुप्रीतः सुसमाहितः (हनुमान्) पुष्पैरभ्यर्च्य सत्कृतं

दीप्यमानं वह्निं तयोः (रामसुग्रीवयोः) मध्ये निदधे।

**भावार्थः** - तत्पश्चात् प्रसन्नः हनुमान् पुष्पादिभिः पूजितम् अग्निं रामसुग्रीवयोः मध्ये संस्थापयामास।

7. **ततोऽग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणम्।**

**सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ॥ 7॥**

**अन्वयः** - ततः तौ (रामसुग्रीवौ) दीप्यमानम् अग्निं प्रदक्षिणं चक्रतुः।

(इत्थं) सुग्रीवः राघवश्च वयस्यत्वम् उपागतौ।

**भावार्थः** - तत्पश्चात् रामः एवं सुग्रीवः उभावपि दीप्यमानस्य अग्निनारायणस्य प्रदक्षिणां कृतवन्तौ। एवं प्रकारेण तौ उभावपि परस्परं मित्रतां प्राप्तवन्तौ।

8. **ततः सुप्रीतमनसौ तावुभौ हरिराघवौ।**

**अन्योन्यमभिवीक्षन्तौ न तृप्तिमभिजग्मतुः॥ 8॥**

**अन्वयः** -तत तौ उभौ सुप्रीतमनसौ अन्योन्यम् अभिवीक्षन्तौ

हरिराघवौ तृप्तिं न अभिजग्मतुः।

**भावार्थः** - अनन्तरं रामः सुग्रीवश्च परस्परं सख्यभावं प्राप्य हर्षवन्तौ आस्ताम्। एवं च अन्योन्यं प्रति पश्यन्तौ कथमपि सन्तोषं न प्राप्तवन्तौ इति भावः।

9. **त्वं वयस्योऽसि हृद्यो मे एकं दुःखं सुखं च नौ।**

**सुग्रीवो राघवं वाक्यमित्युवाच प्रहृष्टवत्॥9॥**

**अन्वयः** - ''त्वं मे हृद्यः वयस्यः असि'' ''नौ दुःखं सुखं च एकम् (अस्ति)'' इति वाक्यं प्रहृष्टवत् सुग्रीवः राघवम् उवाच।

**भावार्थः** - एवं मैत्रीभावे संजाते सति सुग्रीवः रामं प्रति कथयति - हे रघुनन्दन! इतः प्रभृति त्वं मम प्रियः सखा असि। तव दुःखं मम दुःखं, तव सुखं मम सुखम्, आवयोः सुखदुःखं च समानमेव अस्ति।

**10. ततः सुपर्णबहुलां भङ्क्त्वा शाखां सुपुष्पिताम्।**
**सालस्यास्तीर्य सुग्रीवो निषसाद सराघवः॥ 10॥**

**अन्वयः** - ततः सराघवः सुग्रीवः सालस्य सुपर्णबहुलां सुपुष्पिताम् शाखां भङ्क्त्वा आस्तीर्य (च) निषसाद।

**भावार्थः** - तत्पश्चात् रामेण साकं सुग्रीवः सालनामकवृक्षविशेषस्य पुष्पान्वितायाः शाखायाः कोमलास्तरणे उपविष्टवान्।

**11. लक्ष्मणायाथ संहृष्टो हनुमान्मारुतात्मजः।**
**शाखां चन्दनवृक्षस्य ददौ परमपुष्पिताम्॥11॥**

**अन्वयः** - अथ संहृष्टः मारुतात्मजः हनुमान् चन्दनवृक्षस्य परमपुष्पितां शाखां लक्ष्मणाय ददौ।

**भावार्थः** - रामसुग्रीवयोः उपदेशानान्तरं प्रसन्नः वायुनन्दनः हनुमान् लक्ष्मणस्यापि उपवेशनार्थं चन्दनवृक्षस्य कोमलपुष्पान्वितायाः शाखायाः व्यवस्थां कृतवान्।

**12. ततः प्रहृष्टः सुग्रीवः लक्ष्मणं मधुरया गिरा।**
**प्रत्युवाच तदा रामं हर्षव्याकुललोचनः॥12॥**

**अन्वयः** - ततः प्रहृष्टः हर्षव्याकुललोचनः सुग्रीवः तदा मधुरया गिरा रामं (प्रति) लक्ष्मणम् उवाच।

**भावार्थः** - एवं तेषु उपविष्टेषु सुग्रीवः हर्षव्याकुललोचनः मधुरया वाचा रामं प्रति निम्नोक्तम् उक्तवान्।

**13. अहं विनिकृतो राम चरामीह भयार्दितः।**
**हृतभार्यो वने त्रस्तो दुर्गमेतदुपाश्रितः॥13॥**

**अन्वयः** - (हे) राम! विनिकृतः, भयार्दितः, हृतभार्यः, एतत् दुर्गम् उपाश्रितः, त्रस्तः अहम् इह वने चरामि।

**भावार्थः** - सुग्रीवः रामं प्रति कथयति - हे रघुनन्दन! अहं वालिना पराजितः अस्मि। तेन एव मम भार्या अपहृता अस्ति। सः मां हन्तुम् इच्छति। अतः भयाकुलः अहम् अस्मिन् वने निगूढो भूत्वा विचरामि।

**14. सोऽहं त्रस्तो वने भीतो वसाम्युद्भ्रान्तचेतनः।**
**वालिना निकृतो भ्रात्रा कृतवैरश्च राघव॥14॥**

**अन्वयः** - (हे) राघव! सः अहं त्रस्तः, भीतः, उद्भ्रान्तचेतनः, भ्रात्रा वालिना निकृतः कृतवैरः च वने वसामि।

**भावार्थः** - हे राम! अहं वालिना पराजितः बद्धवैरश्च अस्मि। अतः तेन वालिना भयाकुलः, त्रस्तः चेतनारहित इव भूत्वा वने वसामि।

**15. वालिनो मे महाभाग भयार्त्तस्याभयं कुरु।**
**कर्तुमर्हसि काकुत्स्थ भयं मे न भवेद्यथा॥15॥**

**अन्वयः** - (हे) महाभाग! वालिना भयार्त्तस्य मे अभयं कुरु। (हे) काकुत्स्थ! मे यथा भयं न भवेत् (तथा) कर्तुम् अर्हसि।

**भावार्थः** - सुग्रीवः रामं निगदति हे महाभाग! वालिना अहं भृशं भययुक्तोऽस्मि अतः हे काकुत्स्थ! (राम) यथाऽहं निर्भयो भवेयं तथा कुरुष्व।

**भावार्थः** - हे राघव! वालितः मे भयम् अस्ति ततः मे अभयदानं देहि। (हे) काकुत्स्थ! मम भयं यथा विनश्येत् तथा कुरु।

**16. एवमुक्तस्तु तेजस्वी धर्मज्ञो धर्मवत्सलः।**
**प्रत्यभाषत काकुत्स्थः सुग्रीवं प्रहसन्निव॥16॥**

**अन्वयः** - (सः) तु तेजस्वी धर्मज्ञः धर्मवत्सलः काकुत्स्थः एवम् उक्तः (सन्) प्रहसन् इव सुग्रीवं प्रत्यभाषत।

**भावार्थः** - सुग्रीवस्य उपर्युक्ताम् आत्मव्यथां श्रुत्वा तेजोयुक्तः, धर्मज्ञाता, धर्मप्रियः रामः किञ्चिद् विहस्य सुग्रीवं प्रति उक्तवान्।

**17. उपकारकफलं मित्रं विदितं मे महाकपे।**
**वालिनं तं वधिष्यामि तव भार्यापहारिणम्॥17॥**

**अन्वयः** - (हे) महाकपे! मे उपकारफलं मित्रं विदितम्। तव भार्यापहारिणं तं वालिनं वधिष्यामि।

**भावार्थः** - हे सुग्रीव! एतस्य मैत्रीभावस्य उपकारकं फलं त्वम् अचिरादेव प्राप्स्यसि। अहं तव पत्न्याः हरणकर्तारं तं दुष्टवालिनं मारयिष्यामि।

## शब्दार्थाः

**धर्मविनीतः** = धर्मविनययुक्तः
**सौहार्दम्** = मैत्रीभावः
**संप्रहृष्टमनाः** = प्रसन्नचित्तः
**अरिन्दमः** = शत्रुदमनकरः
**अभिवीक्षन्तौ** = पश्यन्तौ
**निषसाद** = उपविष्टवान्
**सर्ववत्सलः** = सर्वेषां कृते स्नेहयुक्तः
**प्रसारितः** = विस्तारितः
**पीडयामास** = मर्दयामास
**पावकम्** = अग्निम्
**अभिजग्मतुः** = अभिययतुः
**लक्ष्मणम्** = मनोहरम्
**काकुत्स्थः** = ककुत्स्थवंशसम्भूतः, रामः॥
**सुतपाः** = तपस्वी
**ध्रुवा** = निश्चिता, अचला
**पर्यष्वजत** = आलिंगयत्
**सुप्रीतमनसौ** = प्रसन्नमानसयुक्तौ
**हृद्यः** = मनोहारकः
**उपाश्रितः** = आश्रयं प्राप्तः

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) भगवद्गुणाः ........ आख्यायिता। (वायुपुत्रेण, सुग्रीवेण, लक्ष्मणेन)
(2) ........ सौहार्दम् इच्छति। (हनुमान्, सुग्रीवः, लक्ष्मणः)
(3) सख्यार्थं ........ बाहुः प्रसारितः। (सुग्रीवेण, रामेण, वायुपुत्रेण)
(4) ........ दुःखं सुखं च एकमेव। (रामसुग्रीवयोः, आवयोः, तयोः)
(5) हरिराघवौ इत्यस्य शब्दस्य समासः ........ अस्ति। (तत्पुरुषः, द्वन्द्वः, बहुव्रीहिः)
(6) श्लक्ष्णम् इत्यस्य ........ अर्थः भवति। (कठोरम्, मनोहरम्, कोमलम्)
(7) सुग्रीवेण सह ........ वैरं कृतम्। (हनुमता, वालिना, रामेण)
(8) काकुत्स्थः ........ सम्बोधनम् अस्ति। (हनुमतः, सुग्रीवस्य, रामस्य)

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) सुग्रीवः रामाय किं वदति?
(2) रामसुग्रीवयोः मैत्री कस्य साक्ष्ये अभवत्?
(3) सुग्रीवेण सह कस्य वैरम् अभवत्?
(4) रामः सुग्रीवं प्रति किं कथयति?
(5) 'अरिन्दमः' कस्य विशेषणम्।

**3. द्वित्रिवाक्यैः उत्तरं लिखत।**

(1) सुग्रीवः कथं भयार्त्तः आसीत्?
(2) सुग्रीवेण सह वालिनः कथं वैरम् अभवत्?
(3) सुग्रीवः किमर्थं वने विचरति?

**4. (क) श्लोकपूर्तिं कुरुत :**

(1) ''रोचते यदि मे........'' श्लोकस्य भावं स्पष्टं कुरुत।

(2) रामसुग्रीवयोः मैत्रीभावं वर्णयत।

(3) रामस्य गुणान् वर्णयत।

**(ख) विभक्तिपरिचयो देयः।**

| | | |
|---|---|---|
| (1) वायुपुत्रेण | (2) हनुमतः | (3) काष्ठयोः |
| (4) वने | (5) मधुरया | (6) वालिना |

**(ग) सन्धिविच्छेदं कुरुत।**

| | | |
|---|---|---|
| (1) तन्ममैवैषः | (2) लाभश्चैवोत्तमः | (3) सालस्यास्तीर्य |
| (4) मारुतात्मजः | (5) वसाम्युद्भ्रान्तचेतनः | (6) ममैव |

**(घ) समासपरिचयो लिखत।**

| | | |
|---|---|---|
| (1) धर्मविनीतः | (2) हरिराघवौ | (3) हर्षव्याकुललोचनः |
| (4) हृतभार्यः | (5) अचेतनः | (6) सुपर्णबहुलाम् |

**(ङ) धातुपरिचयो देयः**

| | | |
|---|---|---|
| (1) कथयति | (2) चकार | (3) जनयामास |
| (4) जग्मतुः | (5) विचरामि | |

**छात्रप्रवृत्तिः**

रामायणस्य कमपि एकं प्रसंगम् आदाय मूल्यशिक्षणं पाठयत।

**अध्यापकप्रवृत्तिः**

विद्यार्थिभ्यः रामायणस्य विविधप्रकाराणां परिचयं यच्छतु तथा च अध्यात्मरामायणस्य वाचनं कारयतु।

●

## ३

# त्रैविध्यम्

**प्रस्तावना**

श्रीमद्भगवद्गीता स्वयं परब्रह्मण: मुखारविन्दात् निर्गतोपदेश: विद्यते। एषा गीता भगवता कृष्णेन प्रथमं सूर्याय प्रदत्ता, सूर्येण मनवे दत्ता, मनुना इक्ष्वाकवे दत्ता। तेन इक्ष्वाकुणा सर्वेभ्य: प्रदत्ता। यदा मध्ये कालप्रवाहे अस्या: लोप: अभवत् तदा अर्जुनमाध्यमेन भगवता श्रीकृष्णेन पुन: संस्थापिता। गीताया: गणना उपनिषत्सु अपि भवति।

पाठोऽयं श्रीमद्भगवद्गीतात: उद्धृतोऽस्ति। प्रारंभे एव श्लोकत्रये श्रद्धा कीदृशी अवधार्या? तस्य प्रतिपादनं कृतमस्ति। तदनु सांप्रतकाले मानवा: गृहभोजनं परित्यज्य अल्पाहारगृहं गत्वा प्राय: रुग्णा: भवन्ति, अत: कीदृश: आहार: भोक्तव्य: अस्माभि:? इति परेषु चतुर्षु श्लोकेषु निवेदितम्।



अन्तिमेषु चतुर्षु कीदृश: यज्ञ: उत्तम इति दर्शितमस्ति। श्रद्धया, शुद्धाहारेण पवित्रयज्ञेन च मानवजीवनं शान्तं, सरसं, शुद्धं च भविष्यति।

1. **त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।**
   **सात्त्विकी राजसी चैव तामसी चेति तां श्रृणु ॥ 17-2॥**

**अन्वय:** - सा श्रद्धा देहिनां स्वभावजा त्रिविधा भवति।
सात्त्विकी राजसी चैव तामसी चेति तां श्रृणु॥

**भावार्थ:** - देहिनां स्वभावजा श्रद्धा त्रिविधा भवति,
सा सात्त्विकी, राजसी एवं तामसीति त्रिविधा, तां त्रिविधां श्रद्धां श्रृणु॥

**2. सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत।**

**श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः॥ 17-3॥**

**अन्वयः** - हे भारत। सर्वस्य सत्त्वानुरूपा श्रद्धा भवति।

अयं पुरूषः श्रद्धामयः। यः यच्छ्रद्धः, सः सः एव॥

**भावार्थः** - हे भारत। सर्वेषां श्रद्धा तेषां सत्त्वानुसारं भवति। इत्थं यादृशी श्रद्धा पुरुषे भवति तादृशः एव सः भवति।

**3. यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः।**

**प्रेतान् भूतगणांश्चान्ये यजन्ते तामसाः जनाः ॥ 17-4॥**

**अन्वयः** -सात्त्विकाः देवान् यजन्ते, राजसाः यक्षरक्षांसि यजन्ते।

अन्ये तामसाः जनाः प्रेतान् भूतगणान् च यजन्ते॥

**भावार्थः** - ये सात्विकाः जनाः ते देवान् पूजयन्ति। ये रजोगुणयुक्ताः मानवाः ते यक्षरक्षांसि भजन्ति। अन्ये ये तमोगुणिनः सन्ति ते भूतप्रेतादिगणान् अर्चयन्ति।

**3. आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः।**

**यज्ञस्तपस्तथा दानं तेषां भेदमिमं श्रृणु॥ 17-07॥**

**अन्वयः** -सर्वस्य अपि प्रियः आहारः तु त्रिविधो भवति।

तथैव यज्ञः, तपः, दानमस्ति। तेषाम् इमं भेदं श्रृणु।

**भावार्थः** - भगवान श्रीकृष्णः कथयति यथा जगति सर्वोऽपि जनः आहारे भिन्नरूचिः (त्रिविधः) भवति तथैव यज्ञतपोदानादिषु भिन्नरुचिः भवति। तेषां भेदान् श्रृणु।

**4. आयु सत्त्वबलारोग्य सुखप्रीतिवर्धनाः।**

**रस्याः स्निग्धाःस्थिराः हृद्याः आहारा सात्विकप्रियाः॥ 17-8॥**

**अन्वयः** - रस्याः, स्निग्धाः, स्थिराः, हृद्याः आहाराः सात्त्विकप्रियाः

(ते) आहाराः आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।

**भावार्थः** - रसयुक्ताः, पुष्टिदायकाः, सुपाच्याः, मनोहराः, आहाराः सात्विकजनेभ्यः प्रियाः सन्ति। तैः आहरैः आयुषः, सत्त्वस्य, बलस्य, आरोग्यस्य, सुखस्य, प्रीतेश्च विवर्धनं भवति।

**5. कट्वम्ललवणात्युष्णतीक्ष्णरूक्ष्णविदाहिनः।**

**आहारा राजसस्येष्टाः दुःखशोकामयप्रदाः॥ 17-9॥**

**अन्वयः** - कट्वैम्ललवणात्युष्णतीक्ष्णरूक्ष्णविदाहिनः आहाराः राजसस्य इष्टाः। (ते) दुःखशोकामयप्रदाः।

**भावार्थः** - रजोगुणिजनेभ्यः कटुमयाः, अम्लमयाः, लवणमयाः, अत्युष्णमयाः, तीक्ष्णमयाः, रूक्ष्णमयाः, दाहकराश्च आहाराः इष्टाः। ते आहाराः प्रायः दुःखशोकरोगप्रदाः भवन्ति।

**6. यातयामं गतरसं पूति पर्युषितं च यत्।**

**उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥ 17-10॥**

**अन्वयः** - यातयामं गतरसं पूति पर्युषितम् उच्छिष्टम् अमेध्यं चापि यत् भोजनं तत् तामसप्रियम् (भवति)।

**भावार्थः** - व्यतीतकालं, स्वादहीनं, दुर्गन्धप्रयुक्तम्, उच्छिष्टम्, अपवित्रं यत् भोजनं तत् तामसजनेभ्यः प्रियम् आस्ति।

**7. अफलाकांक्षिभिर्यज्ञो विधिदिष्टो य इज्यते।**

**यष्टव्यमेवेति मनः समाधाय सः सात्त्विकः॥ 17-11॥**

**अन्वयः** -अफलाकांक्षिभिः यष्टव्यम् एवेति मनः समाधाय विधिदिष्टः यज्ञ इज्यते सः सात्त्विकः

**भावार्थः** - अफलाकांक्षिभिः केवलं यज्ञः कर्तव्यः इत्येव धिया श्रुतिनिर्दिष्टः यः यज्ञः अनुष्ठीयते सः सात्त्विकयज्ञः उच्यते।

**8. अभिसंधाय तु फलं दम्भार्थमपि चैव यत्।**

**इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्॥ 17-12॥**

**अन्वयः** -हे भरतश्रेष्ठ! फलम् अभिसन्धाय दम्भार्थमपि च एव यत् इज्यते, तं यज्ञं राजसं विद्धि।

**भावार्थः** - भगवान कथयति हे भरतश्रेष्ठ! यदि मनुष्येण फलस्य आकांक्षां कृत्वा यजनं क्रियते चेत् सः यज्ञः राजसः भवति। अतः तादृशं यज्ञं राजसम् अवगच्छ।

**9. विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।**

**श्रद्धाविरहितं यज्ञं तामसं परिचक्षते॥ 17-13॥**

**अन्वयः** -विधिहीनम् असृष्टान्नं मन्त्रहीनम् अदक्षिणम्।

श्रद्धाविरहितं यज्ञं तामसं परिचक्षते॥

**भावार्थः** - यः यज्ञः शास्त्रविरहितः स्यात्, प्रसादरहितः मन्त्रहीनः, दक्षिणारहितः, अश्रद्धया कृतो यज्ञः तामसः इति कथ्यते।

### शब्दार्थाः

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| **यक्षरक्षांसि** | = | असुरगणाः | **विवर्धनाः** | = | वृद्धिकराः | **अमेध्यम्** | = | अपवित्रम् |
| **विदाहि** | = | दाहयुक्तम् | **आमयः** | = | रोगः | **परिचक्षते** | = | कथ्यते |
| **पूति** | = | दुर्गन्धयुक्तम् | **विधिदिष्टः** | = | वेदोक्तः | | | |

### स्वाध्यायः

**1. कोष्टकदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पुरयत।**

(1) श्रद्धा ........ भवति।
(अ) चतुर्विधा (ब) त्रिविधा (क) पञ्चविधा

(2) सात्त्विकाः ........ यजन्ते।
(अ) जनान् (ब) राक्षसान् (क) देवान्

(3) ........ आहाराः आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ?
(अ) तामसाः (ख) सात्त्विकाः (ग) राजसाः

(4) विदाहिनः आहाराः ........ इष्टाः ?
(क) पशोः (ब) राज्ञः (क) देवस्य

(5) अपवित्रं यत् भोजनं तत् ........ जनेभ्यः प्रियमस्ति ?
(अ) उत्तम (ब) तामस (क) दरिद्र

(6) श्रीमद्भगवदगीता ........ मुखारविन्दात् निर्गतोपदेशः।
(अ) शिवस्य (ब) कृष्णस्य (क) रामस्य

(7) राजसयज्ञः ......... क्रियते ?
(क) धनार्थम् (ब) दम्भार्थम् (ग) मोक्षार्थम्

(8) श्रद्धाविरहितः यज्ञः ........ परिचक्षते ?
(अ) सरलः (ब) देवः (क) तामसः

**2. एकेकवाक्येन उत्तर यच्छत।**

(1) श्रद्धा देहिनां स्वभावजा कतिविधा भवति ?

(2) तामसाः जनाः कान् यजन्ते ?

(3) दम्भार्थं कृतः यज्ञः कीदृशः कथ्यते ?

(4) रजोगुणिजनेभ्यः कीदृशाः आहाराः इष्टाः ?

**3. द्वित्रिवाक्यैः उत्तरं लिखत।**

(1) श्रद्धाकतिविधा ? काः च ताः ?

(2) किदृशाः जनाः कीदृशीं श्रद्धां सेवन्ते ?

(3) राजसिनः आहारस्य के गुणाः ?

**4. सविस्तरं उत्तराणि लिखत।**

(1) तमोयुक्ताहारस्य वर्णनं कुरुत।

(2) सात्त्विकयज्ञस्य का परिभाषा ?

(3) राजसयज्ञस्य का व्याख्या ?

(4) तामसयज्ञः कः ?

**5. सूचनानुसारं कुरुत।**

**(क) विभक्तिपरिचयो देयः**

(1) देहिनाम् (2) तामसाः (3) आहाराः (4) राजसस्य (5) तेषाम्

**(ख ) धातुपरिचयो देयः।**

(1) परिचक्षते (2) श्रुणु (3) विद्धि (4) इज्यते

**(ग ) समासपरिचयो देयः**

(1) मन्त्रहीनम् (2) सात्त्विकप्रियाः (3) त्रिविधा (4) विधिदिष्टः (5) विधिहीनम्

**छात्रप्रवृत्तिः**

छात्राः गीतायां प्रतिपादितज्ञानभक्तिकर्मविषये पठेयुः।

**अध्यापकप्रवृत्तिः**

अन्योपनिषदां विषये छात्रान् ज्ञापयतु।

●

# ४

# विशेषको यावदयं न शुष्कः

**प्रस्तावना**

महाकविः अश्वघोषः कविजगति भाषामाधुर्येण अनुपमरचनाभिः रसालङ्कारगुणाढ्यकृतिभिः कविहृदयेषु आदर्शस्थानम् बिभर्ति। इतिहासविदां मतेन प्रथमशताब्दौ जातस्य कवेः कालः सम्राजः अशोकस्य परवर्ती आसीत्। साहित्यदृष्ट्या नैरन्तर्यरसप्रवाहेण उपमाद्यलङ्कारमाधुर्येण कविचातुर्यं प्राचुर्येण पदे-पदे प्रकाश्यते। बुद्धचरितं सौन्दरनन्दं च कवेरिदं महाकाव्यद्वयम् अद्यापि रसिकानां पाठकानां मुदमातनोति।

सौन्दरनन्दाख्यमिदं महाकाव्यम् अष्टादशसर्गात्मकमस्ति। अस्मिन् महाकाव्ये गौतमबुद्धस्य वैमात्रेयभ्रातुः नन्दस्य एवं नन्दपत्नीसुन्दर्याः कथा वर्णिताऽस्ति। पूर्वार्धे नन्दसुन्दर्योः दाम्पत्ये अनन्याश्रयत्वम्, चित्तकर्षणं, दाम्पत्यकेलिकलावर्णनं च कृतमस्ति। अपरार्द्धे नन्दस्य प्रव्रज्यावर्णनं वर्तते।



महाकाव्यस्यास्य चतुर्थसर्गात् गृहीतेषु पद्येषु नन्दसुन्दर्योः राजभवने गौतमबुद्धस्य भिक्षार्थगमनम्, समादराद्यभावे-पुनः प्रतिगमनम्, नन्दस्य गुरोः दर्शनाय सुन्दर्यनुमोदनं वर्णितमस्ति। प्रसंगोऽयं सौन्दरनन्दग्रन्थस्य चतुर्थसर्गस्य 31 तः आरभ्यः 42 श्लोकेभ्यः गृहीतः अस्ति।

## चतुर्थसर्गसारांशः

चतुर्थेऽस्मिन् सर्गे नन्दसुन्दर्योः विहारवर्णनं कृतमस्ति। चक्रवाकपक्षियुगलम् इव अनन्यासक्तमानसौ तौ क्षणार्धमपि परस्परं नयनपथदूरवर्तिनौ नास्ताम्। कथं स्वामिना स्वभामिन्याः प्रियायाः सौभाग्यालंकरणं कर्तव्यमिति वा मानिनी रुष्टा चेत् सा कथम् अनुनेतव्या इति वर्णितम्।

सर्गेऽस्मिन् विहारगग्नयुगले सहसा तथागतः बुद्धः भिक्षार्थं राजभवनं समागच्छति किन्तु कार्यमग्नासु दासीषु न काऽपि तं तथागतं बुद्धं ज्ञातुं शक्नोति।

बुद्धः भैक्ष्यमप्राप्य ततः प्रतिनिवर्तते। एका दासी तं प्रतिव्रजन्तं विलोक्य सत्वरं सर्ववृत्तान्तं नन्दाय निवेदयति। अनेन दुःखितः क्षुभितश्च सन् क्षमायाचनाय गुरुं दिदृक्षुः सुन्दरीम् अनुमतिं याचते। साऽपि वियोगकातरा अनिच्छन्त्यपि ''अङ्गरागः शुष्को न भवेत् तत्प्राक् प्रत्यागमनपणेन सह तम् अनुमोदते।'' नन्दोऽपि प्रेम्णोत्कंठया पुनः पुनः प्रियां पश्यन् व्रजति॥

---

**1. श्रुत्वा महर्षेः स गृहप्रवेशं सत्कारहीनं च पुनः प्रयाणम्।**
**चचाल चित्राभरणाम्बरस्रक्कल्पद्रुमो धूत इवानिलेन॥ 4-31॥**

**अन्वयः** -महर्षेः गृहप्रवेशं पुनः सत्कारहीनं प्रयाणं च श्रुत्वा सः चित्राभरणाम्बरस्रक् अनिलेन धूतः कल्पद्रुम इव चचाल॥

**भावार्थः** -नन्दसुन्दर्योः विहारोद्याने सुमञ्जुलकेलिकाले व्यस्तासु च दासीषु ''भगवान् बुद्धः राजभवनं प्रविष्टवान् एवं तत्र स्वागतम् आदरम् अलब्ध्वा पुनः राजभवनात् निर्गतवान्'' इति दास्या वचः श्रुत्वा यथा समीरणवेगेन कल्पवृक्षः प्रकम्पितो भवति तथा विविधवस्त्रालंकारमालाभूषितो नन्दः व्यग्रतया कम्पितवान्।

**2. कृत्वाञ्जलिं मूर्धनि पद्मकल्पं ततः स कान्तां गमनं ययाचे।**
**कर्तुं गमिष्यामि गुरौ प्रणामं मामभ्यनुज्ञातुमिहार्हसीति॥ 4-32॥**

**अन्वयः** - ततः सः मूर्धनि पद्मकल्पम् अञ्जलिं कृत्वा कान्तां गमनं ययाचे, गुरौ प्रणामं कर्तुं गमिष्यामि इह अभ्यनुज्ञातुम् अर्हसि इति।

**भावार्थः** - महर्षेः राजभवनात् प्रयाणं श्रुत्वा सः नृपः नन्दः शिरसि पद्ममुद्राञ्जलिं कृत्वा स्वप्रियतमां कान्ताम् अनुमतिं याचते यत् अहं गुरोः दर्शनम् अभिवादनं कर्तुं गन्तुमिच्छामि (जिगमिषामि) तद् भवती अनुमोदताम्।

**3. सा वेपाना परिषस्वजे तं शालं लता वातसमीरितेव।**
**ददर्श चाश्रुप्लुतलोलनेत्रा दीर्घं च निःश्वस्य वचोऽभ्युवाच॥ 4-33॥**

**अन्वयः** - सा वेपमाना वातसमीरिता लता इव शालम्, तं परिषस्वजे। च अश्रुपूर्णनेत्रा ददर्श च, दीर्घं निःश्वस्य वचः अभ्युवाच॥

**भावार्थः** - सा सुन्दरी विरहभयेन कम्पमाना यथा समीरकम्पिता वल्लरी तरुमालिङ्ग तथा सा सुन्दरी तं नन्दम् आश्लिष्टवती। तथा च पुनः स्रवत्सलिलनेत्रा नन्दम् अपश्यत् एवं दीर्घं निःश्वस्य सा वचनमब्रवीत्।

**4. नाहं यियासोर्गुरुदर्शनार्थमर्हामि कर्तुं तव धर्मपीडाम्।**
**गच्छार्यपुत्रैहि च शीघ्रमेव विशेषको यावदयं न शुष्कः॥ 4-34॥**

**अन्वयः** - गुरुदर्शनार्थं यियासोः तव धर्मपीडां कर्तुं न अहम् अर्हामि, आर्यपुत्र! गच्छ शीघ्रं च एहि यावत् अयं विशेषकः शुष्कः न (भवेत्)।

**भावार्थः** - (हे स्वामिन्) गुरोः दर्शनार्थं जिगमिषोस्तव धर्मकर्मणि बाधां विधातुम् अहं नेच्छामि। हे आर्यपुत्रः भवान् गच्छतु किन्तु यावदयं आर्द्रः अङ्गरागः शुष्को न भवेत् तत्-प्राक् शीघ्रं भवान् पुनरागच्छतु।

**5. न चेद्भवेस्त्वं खलु दीर्घसूत्रो दण्डं महान्तं त्वयि पातयेयम्।**
**मुहुर्मुहुस्त्वां शयितं कुचाभ्यां विबोधयेयं च न चालपेयम्॥ 4-35॥**

**अन्वयः** - त्वं दीर्घसूत्रः न भवेः खलु (भविष्यसि) चेत् त्वयि महान्त दण्डं पातयेयम्। शयितं त्वां मुहुर्मुहुः कुचाभ्यां विबोधयेयं न च आलपेयम्॥

**भावार्थः** - हे स्वामिन्! किन्तु त्वं यदि पुनरागमने विलम्बं करिष्यसि चेत् अहं दण्डार्हे त्वयि दण्डयिष्यामि। प्रसुप्तं, त्वाम् अहं स्तनाभ्यां वारं वारं जागरितारं करिष्यामि एवञ्च त्वया सह न वदिष्यामि॥

**6. अथाप्यनाश्यानविशेषकायां मय्येष्यसि त्वं त्वरितं ततस्त्वाम्।**
**निपीडयिष्यामि भुजद्वयेन निर्भूषणेनार्द्रविलेपनेन॥ 4-36॥**

**अन्वयः** - अथाऽपि अनाश्यानविशेषकायां मयि त्वं त्वरितम् एष्यसि, ततः त्वां निर्भूषणेन आर्द्रविलेपनेन भुजद्वयेन निपीडयिष्यामि॥

**भावार्थः** - यदि भवान् आर्द्राङ्गरागानुलिप्तां मां प्रति त्वरितम् आगमिष्यसि तर्हि तव निरलङ्कृताभ्याम् अङ्गरागलिप्ताभ्यां बाहुभ्याम् अहम् आलिङ्गनं करिष्यामि।

**7. इत्येवमुक्तश्च निपीडितश्च तयासवर्णस्वनया जगाद।**
**एवं करिष्यामि विमुञ्च चण्डि यावत् गुरुर्दूरगतो न मे सः॥ 4-37॥**

**अन्वयः** - तया असवर्णस्वनया इत्येवम् उक्तः च निपीडितश्च सः जगाद चण्डि! एवं करिष्यामि विमुञ्च यावत् मे गुरु दूरगतः न (स्यात्)॥

**भावार्थः** - नन्दप्रियया सुन्दर्या प्रकम्पितगिरया इत्थं प्रकारेण उक्तः आलिङ्गितश्च नन्दः अकथयत् - हे प्रणयकुपिते! देवि! त्वयोक्तमेव करिष्यामि, अधुना मां मुञ्च, मम गुरुः तथागतः दूरगतो न स्यात्।

**8. ततः स्तनोद्वर्तितचन्दनाभ्यां मुक्तो भुजाभ्यां न तु मानसेन।**
**विहाय वेषं मदनानुरूपं सत्कारयोग्यं स वपुबभार॥ 4-38॥**

**अन्वयः** -ततः स्तनोद्वर्तितचन्दनाभ्यां भुजाभ्यां न तु मानसेन मुक्तः सः मदनानुरूपं विहाय सत्कारयोग्यं वपुर्बभार॥

**भावार्थः** - ततः प्रगाढम् आलिङ्गनेन स्तनस्पर्शेन च यस्य भुजयोः चन्दनं गलितं जातं ताभ्यां भुजाभ्यां सः नन्दः मुक्तः जातः न तु हृदयेन। मुक्तो भूत्वा प्रणयानुरूपं रूपं त्यक्त्वा मुनिजनदर्शनयोग्यवस्त्राणि धारयामास।

**9. सा तं प्रयान्तं रमणं प्रदध्यौ प्रध्यानशून्यस्थितनिश्चलाक्षी।**
**स्थितोच्चकर्णा व्यपविद्धशष्पा भ्रान्तं मृगं भ्रान्तमुखी मृगीव॥ 4-39॥**

**अन्वयः** - प्रध्यानशून्यस्थितनिश्चलाक्षी सा तं रमणं प्रयान्तम्, स्थितोच्चकर्णा व्यपविद्धशष्पा भ्रान्तमुखी मृगीव भ्रान्तं मृगम् इव प्रदध्यौ॥

**भावार्थः** - प्रकृष्टचिन्तायुक्ता उदासीना निश्चलनयना सा सुन्दरी तं प्रव्रजन्तं प्रियतमम् ऊर्ध्वश्रवणा परित्यक्ततृणा आवर्तितानना हरिणी परिभ्रान्तं हरिणम् इव ध्यानेन पश्यन्ती आसीत्।

**10. दिदृक्षया क्षिप्तमना मुनेस्तु नन्दः प्रयाणं प्रति तत्वरे च।**
**विवृत्तदृष्टिश्च शनैर्ययौ तां करीव पश्यन् स लडत्करेणुम्॥ 4-11॥**

**अन्वयः** - मुनेः दीदृक्षया आक्षिप्तमनाः तु नन्दः प्रयाणं प्रति च तत्वरे विवृत्तदृष्टिः च तां लडत्करेणुं करी इव पश्यन् शनैः ययौ॥

**भावार्थः** - बुद्धदर्शनोत्कण्ठया सः नन्दः द्रुतपदविन्यासेन प्रस्थानं चकार, परिवर्तितनयनालोकपथे सुन्दरीम् अवलोक्य यथा विलासीनीं गजिनीं दृष्ट्वा गजः शनैश्शनै व्रजति तथा सः नन्दः मन्दगत्या प्रवव्राज॥

**11. छातोदरीं पीनपयोधरोरुं स सुन्दरीं रुक्मदरीमिवाद्रेः।**
**काक्षेण पश्यन्न ततर्प नन्दः पिबन्निवैकेन जलं करेण॥ 4-41॥**

**अन्वयः** - सः नन्दः अद्रेः रुक्मदरीम् इव छातोदरीं पीनपयोधरोरुं सुन्दरीं काक्षेण पश्यन् एकेन करेण जलं पिबन् इव न ततर्प॥

**भावार्थः** - सः नन्दः पर्वतस्य रुक्मकन्दराम् इव तां कृशोदरीं बृहत्पयोधरोरूलावण्यां सुन्दरीं वक्रदृष्ट्या विलोकयन् यथा एककरेण जलं पिबन् इव तृप्तिं न अवाप।

12. **तं गौरवं बुद्धगतं चकर्ष भार्यानुरागः पुनराचकर्ष।**
**सोऽनिश्चयन्नापि ययौ न तस्थौ तुरंस्तरङ्गेष्विव राजहंसः॥ 4-34॥**

**अन्वयः** - बुद्धगतं गौरवं तं चकर्ष भार्यानुरागः पुनः आचकर्ष सः अनिश्चयात् तरङ्गेषु तुरन् राजहंसः इव न अपि ययौ न तस्थौ॥

**भावार्थः** - बुद्धं प्रति यान्तं तं नन्दं गुरुभक्तिः गुरुं प्रति आकृष्टवती तथा प्रियतमानुरागः सुन्दरीं प्रति तं चकर्ष, इत्थं तरङ्गेषु गच्छन् राजहंस इव विचारतरङ्गेषु सः नन्दः किं कर्तव्यमूढतया अनिश्चियन् न वा गन्तुमर्हति स्म न वा स्थातुमानर्ह।

## शब्दार्थाः

**अम्बरम्** = वस्त्रम्
**स्रक्** = माला
**यियासोः** = यातुम् इच्छुकस्य
**विशेषकः** = अङ्गरागः
**दीर्घसूत्रः** = आलस्ययुक्तः
**शष्पम्** = तृणम्
**करेणुः** = गजिनी
**काक्षेण** = वक्रदृष्टया

## स्वाध्यायः

1. **कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**
   (1) राजभवनं ......... प्रविष्ट्वान्। (भगवान् बुद्धः, नन्दः, साधुः)
   (2) सा ......... इव तं शालं परिषस्वजे। (वातः, लता, वेपमाना)
   (3) नाहं ......... गुरुदर्शनार्थम्। (यियासोः, पिपासोः, दिदृक्षोः)
   (4) अहं ......... निपीडयिष्यामि। (हस्तद्वयेन, पदद्वयेन, भुजद्वयेन)
   (5) नन्दः ......... वेषं विहाय गतवान्। (सत्कारयोग्यम्, मदनानुरूपम्, स्वानुरूपम्)
   (6) नन्दः सुन्दर्या भुजाभ्यां मुक्तः न तु .........। (नेत्रेण, हस्तेन, मानसेन)
   (7) नन्दः ......... तां पश्यन् ययौ। (शीघ्रम्, शनैः-शनैः, वायुवेगेन)
   (8) यथा एकेन ......... जलं पिबन् न तृप्यति। (पात्रेण, करेण, हस्तयुगलेन)
2. **एकैकवाक्येन उत्तरं लिखत।**
   (1) नन्दः केन प्रकारेण कम्पितवान्?
   (2) नन्दः केन हेतुना गन्तुमिच्छिति?
   (3) गौतमबुद्धः राजभवनात् किमर्थं प्रतिनिवृत्तः?
   (4) नन्दः कीदृशं वेषं धृत्वा गतवान्?
   (5) महर्षेः नन्दस्य च कः सम्बन्धः?
3. **द्वित्रिवाक्यैः उत्तरं लिखत।**
   (1) महर्षेः सत्कारः किमर्थं न जातः?
   (2) नन्दः किं कृत्वा गमनाय अनुमतिं याचते?
   (3) सुन्दरी केन प्रकारेण नन्दस्य आलिङ्गनम् अकरोत्?

**4. सविस्तरम् उत्तरं लिखत।**

(1) सुन्दरी नन्दाय केन पणेन सह अनुमतिं यच्छति?

(2) नन्दस्य गुरोदर्शनाय गमनं वर्णयत।

(3) तं गौरवं ......... श्लोकस्य भावं स्पष्टं कुरुत।

**5. सूचनानुसारं कुरुत।**

**(क) अ विभागं ब विभागेन सह योजयत।**

| अ | | ब |
|---|---|---|
| (1) अञ्जलिः | - | शालः |
| (2) लता | - | पद्मकल्पम् |
| (3) भुजद्वयेन | - | मृगम् |
| (4) मृगी | - | निर्भूषणेन |
| (5) करेणुः | - | भ्रान्तमुखी |
| (6) भ्रान्तम् | - | करिणी |

**(ख) सन्धिं कुरुत।**

| | | |
|---|---|---|
| (1) मृगी + इव | (2) वि + अपविद्ध | (3) पिबन् + इव + एकेन |
| (4) तरंगेषु + इव | (5) चित्र + आभरण + अम्बर | (6) इव + अनिलेन |

**(ग) सन्धिविच्छेदं कुरुत।**

| | | |
|---|---|---|
| (1) मामभ्यनुज्ञातुम् | (2) वचोऽभ्युवाच | (3) गच्छार्यपुत्रैहि |
| (4) मय्येष्यसि | (5) सोऽनिश्चयन्नापि | (6) यावदयम् |

**(घ) समासपरिचयो देयः।**

| | | |
|---|---|---|
| (1) निश्चलाक्षी | (2) स्थितोच्चकर्णा | (3) पीनपयोधरोरुः |
| (4) धर्मपीडाम् | (5) वातसमीरिता | (6) सत्कारहीनम् |

**(ङ) धातुपरिचयो देयः।**

| | | |
|---|---|---|
| (1) ययाचे | (2) एहि | (3) बभार |
| (4) तत्वरे | (5) प्रदध्यौ | (6) आलपेयम् |

**छात्रप्रवृत्तिः**

बुद्धचरित्रविषयकान् ग्रन्थान् पठन्तु।

**अध्यापकप्रवृत्तिः**

अश्वघोषकवेः विशेषं परिचयं यच्छत।

# ५

# अजविलापः

**प्रस्तावना**

संस्कृतसाहित्यविश्वस्मिन् कविकलिगुरुकालिदासस्य नाम नितान्तं समाद्रियते। महाकविरेषः न केवलं संस्कृतस्य अपितु सम्पूर्णविश्वस्य गौरवं चास्ति। तस्य सप्तरचनाः समुपलभ्यन्ते। यासु 'मालविकाग्निमित्रम्', 'विक्रमोर्वशीयम्' 'अभिज्ञानशाकुन्तलम्' चेति नाटकत्रयम्, 'रघुवंशम्', 'कुमारसंभवम्' इति महाकाव्यद्वयम्, 'ऋतुसंहारम्', 'मेघदूतम्' चेति खण्डकाव्यद्वयमिति। एतासां रचनानां भाषामाधुर्यम्, भावप्राञ्जलत्वं, कविकृतं प्रकृतेः अनुपमवर्णनम् उपमालंकारप्रयोजनं च सर्वमेतद् अद्यापि विदुषां साहित्यरसिकानां मनः समाहरति। कविरेषः राज्ञः विक्रमादित्यस्य नवरत्नेषु अन्यतम आसीदिति जनश्रुतिः।

प्रस्तुतोऽयं पाठ्यांशः रघुवंशमहाकाव्यात् समुद्धृतोऽस्ति। तत्र अष्टमसर्गे राज्ञः अजस्य विलापप्रसङ्गो वर्णितः। सर्गेऽस्मिन् रघोः राज्यत्यागः, अजस्य राज्याभिषेकः, नृपत्वेन राज्ञः अजस्य प्रभावः, विदर्भदेशस्य राजकन्यया सह अजस्य विवाहः, रघोः प्राणत्यागः, अजस्य सानन्दं दाम्पत्यजीवनम्, दशरथजन्मोत्सवः, इन्दुमत्याः निर्वाणम्, अजस्य विलापः अन्ते च देहत्यागः इत्यादयः वर्ण्यविषयाः सन्ति। अत्र विदर्भदेशस्य राजकन्यया सह विवाहानन्तरम् एकदा अजः तया सह राज्योद्याने भ्रममाणः आसीत् तदैव प्रभुसंकीर्तने संलग्नस्य आकाशमार्गेण गच्छतः च नारदस्य वीणायाः पुष्पमेकं दैववशात् इन्दुमत्याः मस्तकोपर्यपतत् तेन तस्याः मृत्युश्चाभवत्। दृष्ट्वैतत् राजा अजः विलापं करोतीति प्रसङ्गः।

अत्र वियोगवर्णने वियोगिनीवृत्तं महाकवेः कालिदासस्य प्रसङ्गग्रथनकौशलं वृत्तविन्यासवैदुष्यञ्च व्यनक्ति।

1. **पतिरङ्कनिषण्णया तया करणापायविभिन्नवर्णया।**
   **समलक्ष्यत बिभ्रदाविलां मृगलेखामुषसीव चन्द्रमाः॥ 8-87॥**

   **अन्वयः** - पतिः अङ्कनिषण्णया करणापायविभिन्नवर्णया तया उषसि आविलां मृगलेखां बिभ्रत् चन्द्रमाः इव समलक्ष्यत।

   **भावार्थः** - इन्दुमत्याः पतिः राजा अजः स्व-अङ्के प्राणानां वियोगकारणात् निषण्णया विनिर्गतशोभया तया इन्दुमत्या सह प्रातःकाले मलिनां लाञ्छनरूपां मृगलेखां बिभ्रत् चन्द्रः इव समदृश्यत इति भावः।

2. **विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम्।**
   **अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु॥ 8-43॥**

   **अन्वयः** - सः (अजः) सहजाम् अपि धीरताम् अपहाय बाष्पगद्गदं विललाप। अभितप्तम् अयः अपि मार्दवं भजते। शरीरिषु कथा एव का?

   भावार्थः - सः नृपः अजः सहजम् अपि धैर्यं विहाय साश्रुगद्ग विलापम् अकरोत्। अभितप्तं लौहम् अपि यदि मृदुतां प्राप्नोति तर्हि शोकसन्तप्तानां मनुष्याणां तु का वार्ता इति भावः।

3. **कुसुमान्यपि गात्रसङ्गमात्प्रभवन्त्यायुरपोहितुं यदि।**
   **न भविष्यति हन्त साधनं किमिवान्यत्प्रहरिष्यतो विधेः॥ 8-44॥**

   **अन्वयः** - कुसुमानि अपि गात्रसङ्गमात् आयुः अपोहितुं यदि प्रभवन्ति, हन्त प्रहरिष्यतः विधेः अन्यत् किम् इव साधनं न भविष्यति।

**भावार्थः** – अजः विलापं कुर्वन् कथयति यत् मृदूनि पुष्पाणि अपि यदि शरीरसङ्गमात् प्राणान् हर्तुं शक्नुवन्ति तर्हि हन्तः। प्रहारं कुर्वतः दैवस्य अन्यत् किम् इव साधनं न भविष्यति अर्थात् सर्वाणि अपि वस्तूनि प्राणघातकानि भवितुम् अर्हन्ति इति भावः।

**4. अथवा मृदु वस्तु हिंसितुं मृदुनैवारभते प्रजान्तकः।**
**हिमसेकविपत्तिरत्र मे नलिनी पूर्वनिदर्शनं मता॥ 8-45॥**

**अन्वयः** – अथवा प्रजान्तकः मृदु वस्तु मृदुना एव हिंसितुम् आरभते। अत्र हिमसेकविपत्तिः नलिनी पूर्वनिदर्शनं मता (अस्ति)।

**भावार्थः** – अन्यस्मिन् पक्षे प्रजान्तकः यमः कोमलं वस्तु कोमलेन एव वस्तुना हन्तुम् उपक्रमते। अर्थात् उक्त-विषये तुषारनिष्यन्देन यस्याः मृत्युः नाशो वा जायते सा नलिनी एव मे प्रथमम् उदाहरणम् अस्ति। द्वितीयम् उदाहरणं पुष्पमृत्युः अर्थात् यथा इन्दुमतीति भावः।

**5. स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम्।**
**विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया॥ 8-46॥**

**अन्वयः** – इयं स्रक् यदि जीवितापहा अस्ति, हृदये निहिता (सती) मां किं न हन्ति। ईश्वरेच्छया क्वचित् अमृतम् अपि विषं भवेत् (क्वचित्) अमृतं वा विषं (भवेत्)।

**भावार्थः** – इयं माला यदि जीवितम् अपहन्ति तर्हि मम वक्षःस्थले स्थापिता इयं माला किमर्थं मां न हन्ति। अथवा उचितम् एवास्ति यत् ईश्वरस्य इच्छया कुत्रचित् विषम् अपि अमृतं भवति क्वचित् वा अमृतमपि विषं भवति। सर्वम् ईश्वरेच्छयैवेति भावः।

**6. अथवा मम भाग्यविप्लवादशनिः कल्पित एव वेधसा।**
**यदनेन तरुर्न पातितः क्षपिता तद्विटपाश्रिता लता॥ 8-47॥**

**अन्वयः** – अथवा मम भाग्यविप्लवात् वेधसा एषः अशनिः कल्पितः यत् अनेन तरुः न पातितः (किन्तु) तद्विटपाश्रिता लता क्षपिता।

**भावार्थः** – मम दुर्भाग्यवशात् विधाता एव एतां पुष्पमालां वज्रं कृतवान् अस्ति, यतः अनेन तरुः अजः न पातितः किन्तु तदजरूपवृक्षाश्रिता लता एव नाशिता। इन्दुमती विनाशिता इति भावः।

**7. शशिनं पुनरेति शर्वरी दयिता द्वन्द्वचरं पतत्रिणम्।**
**इति तौ विरहान्तरक्षमौ कथमत्यन्तगता न मां दहेः॥ 8-87॥**

**अन्वयः** – शर्वरी शशिनं पुनः एति, द्वन्द्वचरं पतत्रिणं दयिता पुनः एति। इति तौ विरहान्तरक्षमी (स्तः), अत्यन्तगता (त्वं) मां कथं न दहेः?

**भावार्थः** – हे प्रिये! रात्रिः चन्द्रमसं पुनः प्राप्नोति, द्वन्द्वचरं पतत्रिणं चक्रवाकं चक्रवाकी अपि प्रातःकाले पुनः प्राप्नोति। अतः तौ द्वावपि (चन्द्रमाः चक्रवाकः) च स्वप्रियायाः विरहकालं सोढुं शक्नुतः, किन्तु त्वं तु मम कृते सर्वथा दूरं गता (मृता) असि। तर्हि त्वं माम् अस्मिन् विरहाग्नौ कथं न दहेः? कथमहं विरहाग्नौ भस्मीभूतो न भवेयम् इति भावः।

**8. गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ।**
**करुणाविमुखेन मृत्युना हरता त्वां, वद किं न मे हृतम्॥ 8-87॥**

**अन्वयः** – (त्वम् एव) गृहिणी, सचिवः, मिथः सखी, ललिते कलाविधौ (च) प्रियशिष्या (असि)। (अतः) त्वां हरता करुणाविमुखेन मृत्युना मे किं न हृतम्? (त्वं) वद।

**भावार्थः** – हे प्रिये! त्वम् एव मे दाराः, परामर्शदाता मन्त्री, एकान्ते सखी, वादित्रादिकलाप्रयोगे प्राज्ञत्वात् प्रियशिष्या आसीः। अतः त्वमेवं कथय यत् समष्टिरूपां त्वां हरता कृपाशून्येन दयाशून्येन वा मृत्युना मम किं न हृतम्? अर्थात् मृत्युना मम सर्वस्वमपि हृतम् इति भावः।

**9. विभवेऽपि सति त्वया विना सुखमेतावदजस्य गण्यताम्।**
**अहृतस्य विलोभनान्तरैर्मम सर्वे विषयास्त्वदाश्रयाः॥ 8-69॥**

**अन्वयः** - विभवे सति अपि त्वया विना अजस्य एतावत् एव सुखं (जनैः) गण्यताम्। विलोभनान्तरैः अहृतस्य मम सर्वे विषयाः त्वदाश्रयाः (सन्ति)।

**भावार्थः** - हे प्रिये। एतावति ऐश्वर्ये धनसम्पत्तौ वा सत्याम् अपि त्वां विना अजस्य सर्वं सुखं नष्टमेव जातम्। अन्यैः वस्तुभिः मम कार्यं वा स्नेहः नास्ति एव यतः मम सर्वविषयसुखानि त्वदाश्रितानि एव सन्ति इति।

**10. विलपन्निति कोसलाधिपः करुणार्थग्रथितं प्रियां पतिः।**
**अकरोत्पृथिवीरुहानपि स्रुतशाखारसबाष्पदूषितान्॥ 8-83॥**

**अन्वयः** - इति कोसलाधिपः प्रियां प्रति करुणार्थग्रथितं विलपन् पृथिवीरुहानपि स्रुतशाखारसबाष्पदूषितान् अकरोत्।

**भावार्थः** - एवं प्रकारेण कोसलाधिपः अजः प्रियाम् इन्दुमतीं प्रति सकरुणं विलापं कुर्वन् वृक्षान् अपि स्रुतशाखामकरन्दबाष्पैः दूषितान् अकरोत्। विलपन्नम् अजं दृष्ट्वा वृक्षाः अपि शाखारसाश्रुभिः विलापम् अकर्वन् इति।

**11. तदलं तदपायचिन्तया विपदुत्पत्तिमतामुपस्थिता।**
**वसुधेयमवेक्ष्यतां त्वया वसुमत्या हि नृपाः कलत्रिणः॥ 8-83॥**

**अन्वयः** - तत् तदपायचिन्तया अलम्। उत्पत्तिमतां विपद् उपस्थिता (अतः) त्वया इयं वसुधा अवेक्ष्यताम्। हि नृपाः वसुमत्या कलत्रिणः (भवन्ति)।

**भावार्थः** - तस्मात् तस्याः इन्दुमत्याः मृत्योः चिन्तया अलम्। यतः संसारेऽस्मिन् यस्य जननं तस्य मरणं निश्चितम् एव अस्ति। अतः त्वया इयं पृथ्वी पालनीया एव। राजानः खलु वसुधया एव कलत्रिणः सन्ति। अर्थात् राज्ञां सहधर्मचारी तु पृथिवी एव इति भावः।

**12. रुदता कुत एव सा पुनर्भवता नानुमृतापि लभ्यते।**
**परलोकजुषां स्वकर्मभिर्गतयो भिन्नपथा हि देहिनाम्॥ 8-85॥**

**अन्वयः** - रुदता भवता सा कुतः एव लभ्यते, अनुमृता अपि पुनः न (लभ्यते)। हि परलोकजुषां देहिनां गतयः स्वकर्मभिः भिन्नपथाः (भवन्ति)।

**भावार्थः** - विलापस्य तु वार्ता एव का? यतः भवता (अजेन) रुदता अपि सा इन्दुमती कुतः पुनर्लभ्यते। अथवा अनुमृता अपि भवता पुनः कदापि न लभ्यते। यतः लोकान्तरभाजां देहिनां गन्तव्यस्थलानि पूर्वाचरितैः स्वपुण्यापुण्यकर्मभिः भिन्नपथानि भवन्तीति भावः।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| **करणापाय** | = प्राणवियोगः, | **आविलाम्** | = मलिनाम् | **अयः** | = लोहम् |
| **हिमसेकः** | = तुषारनिष्यन्दः | **अशनिः** | = वज्रम् | **वेधसा** | = विधात्रा |
| **पतत्रिणम्** | = खगम् (चक्रवाकम्) | **पृथिवीरुहान्** | = वृक्षान् | **कलत्रिणः** | = सभार्याः |
| **स्रक्** | = माला | **शर्वरी** | = रात्रिः | **मिथः (अव्ययः)** | = अन्योन्यम् |
| **तरुः** | = वृक्षः | **देहिनाम्** | = मनुष्याणाम् | **वसुमती** | = पृथ्वी |
| **विभवः** | = सम्पत्तिः | **मृदु** | = कोमलम् | **दयिता** | = भार्या |

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्य विकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) इन्दुमती ......... निषण्णा आसीत्। (बाहौ, अङ्के, वक्षसि)

(2) ......... लोहं मार्दवं भजते। (अभितप्तम्, अभिषक्तिम्, अविदग्धम्)

(3) गात्रसङ्गमात् ......... आयुरपोहितुं शक्नुयुः। (सायकानि, चक्राणिः, कुसुमानि)

(4) ईश्वरेच्छया ......... अपि अमृतं भवेत्। (विषम्, दुग्धम्, नीरम्)

(5) विधात्रा ......... अशनिः कल्पितः। (मोहवशात्, क्रोधवशात्, दुर्भाग्यवशात्)

(6) कोसलाधिपः ......... बाष्पदूषितान् अकरोत्। (पर्वतान्, वृक्षान्, जनान्)

(7) ......... इयं वसुधा अवेक्ष्यताम्। (अजेन, नारदेन, रघुणा)

(8) सहजां धीरतां विहाय ......... विललाप। (चन्द्रः, अजः, अयः)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) अजः कः इव समलक्ष्यत?

(2) कुत्र निहिता स्रक् अजं न हन्ति?

(3) शर्वरी कं पुनः एति?

(4) केषां गतयः स्वकर्मभिः भिन्नपथाः भवन्ति?

(5) राज्ञः अजस्य पूर्वनिदर्शनं किम्?

**3. द्वित्रिवाक्यैः उत्तरं लिखत।**

(1) अजः कथं बाष्पगद्गदं विललाप?

(2) प्रजान्तकः केन किं च हिंसितुम् आरभते?

(3) कौ विरहान्तरक्षमौ स्तः किमर्थं च?

(4) करुणाविमुखेन मृत्युना अजस्य सर्वं कथं हृतम्?

(5) अजस्य सर्वे विषयाः कामाश्रिताः किमर्थं च?

**4. सविस्तरम् उत्तरं लिखत।**

(1) अजः किमर्थम् एवं मन्यते यत् वेधसा तरुः न पातितः किन्तु विटपाश्रिता लता क्षपिता? इति।

(2) "वसुमत्या हि नृपाः कलत्रिणः" इति ससन्दर्भं व्याख्यायताम्।

(3) "प्रहरिष्यतः विधेः अन्यत् किमिव साधनं न भविष्यति" इत्यस्य भावं स्पष्टं कुरुत।

**5. प्रदत्तसूचनानुसारं कुरुत।**

**(क) अ विभागं ब विभागेन सह योजयत।**

| अ | | ब |
|---|---|---|
| (1) स्रगियं यदि जीवितापहा | - | प्रभवन्त्यायुरपोहितुं यदि। |
| (2) कुसुमान्यपि गात्रसङ्गमात् | - | हरता त्वां वद किं न मे हृतम्। |
| (3) रुदता कुत एव सा पुनर् | - | हृदये किं निहिता न हन्ति माम् |
| (4) करुणाविमुखेन मृत्युना | - | वसुमत्या हि नृपाः कलत्रिणः। |
| (5) वसुधेयमवेक्ष्यतां त्वया | - | भवता नानुमृतापि लभ्यते। |

**( ख ) विभक्तिपरिचयो देयः।**

| | | |
|---|---|---|
| (1) उषसि | (2) शरीरिषु | (3) विधेः |
| (4) वेधसा | (5) शशिनम् | (6) भवता |

**( ग ) सन्धिविच्छेदं कुरुत।**

| | | |
|---|---|---|
| (1) नानुमृतापि | (2) वसुधेयम् | (3) विलपन्निति |
| (4) पुनरेति | (5) स्त्रगियम् | (6) मृदुनैवारभते |

**( घ ) सन्धिं कुरुत।**

| | | |
|---|---|---|
| (1) उषसि + इव | (2) कुसुमानि + अपि | (3) विपत्तिः + अत्र |
| (4) भवेत् + अमृतम् | (5) विभवे + अपि | (6) कृतः + एव |

**( ङ ) समासपरिचयो देयः।**

| | | |
|---|---|---|
| (1) अकरोत् | (2) गण्यताम् | (3) एति |
| (4) भविष्यति | (5) आरभते | (6) समलक्ष्यत |

**( च ) धातुपरिचयो देयः।**

| | | |
|---|---|---|
| (1) प्रियशिष्या | (2) भिन्नपथाः | (3) कोसलाधिपः |
| (4) गात्रसङ्गमात् | (5) मृगलेखाम् | (6) अङ्कनिषण्णया |

**छात्रप्रवृत्तिः**

प्रदत्तपाठात् 'उपमा' अलङ्कारस्य उदाहरणानि चित्वा सलक्षणं प्रतिपादयत।

**अध्यापकप्रवृत्तिः**

कविकालिदासस्य अन्यासाम् कृतीनाम् परिचयं कारयेयुः।

●

# ६

# अन्योक्तय:

**प्रस्तावना**

संस्कृतवाङ्मये अन्योक्तीनां विशिष्टं स्थानं वर्तते। अन्योक्ति: एक: अर्थालङ्कारविशेष: अस्ति। तथापि अन्योक्तिमाश्रित्य स्वतन्त्रसाहित्यमप्युपलभ्यते। महाकविशम्भो: अन्योक्तिमाला, हंसविजयगणिना सङ्कलिता अन्योक्तिमुक्तावली, अन्योक्तिशतकम् इत्यादीनि अन्योक्तिपराणि ग्रन्थरत्नानि सन्ति। अन्योक्ते: अपरं नामधेयम् अप्रस्तुतप्रशंसा अप्यस्ति। बहुत्र अन्योक्ते: लक्षणानि प्रदत्तनि सन्ति, यथा–

1. **असमानविशेषणमपि यत्र समानेतिवृत्तमुपमेयम्।**
**उक्तेन गम्यते परमुपमानेनेति सान्योक्ति:॥**
**- काव्यालङ्कार:**

2. **सामान्यविशेषे कार्ये कारणे प्रस्तुते तदन्यस्य तुल्ये तुल्यस्य चोक्तिरन्योक्ति:॥**
**- श्रीहेमचंद्राचार्य:**

3. **अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया॥ - मम्मट:**

संक्षेपेण उच्यते चेत् अन्यमाश्रित्य अन्यं प्रति उक्ति: अन्योक्ति:। यत्र कवि: प्रस्तुतवर्णनमाध्यमेन अप्रस्तुतस्यापि स्तुतिनिन्दादि द्योतयति, सा अन्योक्ति: उच्यते। जगन्नाथप्रभृतीनाम् अन्योक्तय: बहु प्रसिद्धचरा: सन्ति।

अन्योक्तिमाध्यमेन अप्रत्यक्षरूपेण व्याजेन वा कस्यचिदपि दोषस्य निन्दा, गुणस्य च प्रशंसा द्योत्यते। तेने मनुष्यजीवने सत्प्रेरणाया: अंकुरा अपि प्रस्फुटन्ति। अत: पाठेऽस्मिन् वयम् एवंविधा: काश्चन अन्योक्ती: पठिष्याम:।

---

1. **अखिलेषु विहङ्गेषु हन्त! स्वच्छन्दचारिषु।**
**शुक! पञ्जरबन्धस्ते मधुराणां गिरां फलम्॥**

**अन्वय:** - हे शुक! अखिलेषु विहङ्गेषु स्वच्छन्दचारिषु (सत्सु) ते पञ्जरबन्ध: हन्त! मधुराणां गिरां फलम् अस्ति।

**भावार्थ:** - अस्मिन् पद्ये कवि: शुकमुद्दिश्य वदति– हे शुक! अस्मिन् धरातले अन्येऽपि बहव: पक्षिण: वसन्ति। किन्तु ते तु यथेच्छविहारिण: सन्ति। त्वं तु पञ्जरे बद्धोऽसि। एतत् तव सुमधुररवस्य फलमस्ति। अस्या: अन्योक्ते: इदमेव तात्पर्यमस्ति - मनुष्य: कदाचित् स्वगुणै: एव विवशतां प्राप्नोति। स्वकीया: गुणा: एव तस्य कृते अभिशापा: भवन्ति। यथा शुकस्य मधुरध्वनि: तस्यैव बन्धनस्य कारणं जातम्।

2. **हे कूप ! त्वं चिरं जीव स्वल्पतोये बहुव्यय:।**
**गुणवद्रिक्तपात्राणि प्राप्नुवन्ति हि पूर्णताम्॥**

**अन्वय:** - हे! कूप! त्वं चिरं जीव। (यतो हि त्वं) स्वल्पतोये बहुव्यय: (असि)। (त्वत्त:) गुणवद्रिक्तपात्राणि पूर्णतां प्राप्नुवन्ति।

**भावार्थ:** - कूपं सम्बोध्य कवे: इयमुक्तिरस्ति–

हे कूप त्वं बहुतिथं कालं यावत् जीव। जलेन परिपूर्णो भव। कारणं त्वं स्वल्पतोयोऽपि बहुव्ययः असि। तव समीपे यानि गुणवन्ति रिक्तानि घटादीनि पात्राणि आयान्ति, तानि त्वत्तः पूर्णतां प्राप्य गच्छन्ति।

अस्यामन्योक्तौ कविः कूपव्याजेन कस्यचित् दानवीरस्य प्रशंसां करोति। यस्य समीपे आगताः कलावन्तः गुणवन्तः अकिञ्चनाः जनाः स्वाभिलषितं प्राप्य परिपूर्णाः भवन्ति।

**3. मधुकर ! मा कुरु शोकं विचर करीरद्रुमस्य कुसुमेषु।**
**घनतुहिनपातदलिता कथं नु सा मालती मिलति॥**

**अन्वयः** - हे मधुकर! शोकं मा कुरु। करीरद्रुमस्य कुसुमेषु विचर। घनतुहिनपातदलिता सा मालती कथं नु मिलति?।

**भावार्थः** - कविः भ्रमरं प्रति कथयति - हे भ्रमर! त्वं शोकरहितो भव। करीरवृक्षस्य पुष्पेषु विहारं कुरु। अतिशयैः तुषारपातैः या मालती विदलिता सा इदानीं कथञ्चिदपि न मिलिष्यति। अर्थात् यद् गतं तद् गतम्। नष्टस्य वस्तुनः प्राप्तिः पुनः दुर्लभा अस्ति। अतः यन्मिलति तत्र सन्तोषचेतसा भाव्यम् इति अस्या अन्योक्तेः आशयः।

**4. तावद् गर्जन्ति मण्डूकाः कूपमाश्रित्य निर्भयाः।**
**यावत् करिकराकारः कृष्णसर्पो न विद्यते॥**

**अन्वयः** - निर्भयाः मण्डूकाः कूपमाश्रित्य तावद् गर्जन्ति, यावद् करिकराकारः कृष्णसर्पः न विद्यते॥

**भावार्थः** - कूपे वसन्तः मण्डूकाः भयरहिताः सन्तः तावत् एव उच्चैः गर्जनं कुर्वन्ति, यावत् हस्तिहस्तसदृशः कृष्णसर्पः नायाति। कृष्णसर्पे आगच्छति सर्वेऽपि पलायन्ते, इति भावः।

समाजेऽपि केचन मानुषमण्डुका खलाः तावत् एवं कोलाहलं वादविवादं कुर्वन्ति, यावत् सर्पकल्पः सत्त्वशाली कश्चित् नागच्छति, इति भावः।

**5. एक एव खगो मानी चिरं जीवतु चातकः।**
**म्रियते वा पिपासायां याचते वा पुरन्दरम्॥**

**अन्वयः** - एकः एव मानी खगः चातकः चिरं जीवतु। (यः) पिपासायां म्रियते वा पुरन्दरं याचते।

**भावार्थः** - अत्र कविः चातकनामानं पक्षिविशेषं प्रशंसन् वदति - सर्वपक्षिषु एक एव मनस्वी चातकः चिराय जीवतु। यतो हि सः पिपासार्तः शतक्रतुम् इन्द्रं जलं याचते अथ वा मरणं प्राप्नोति। न हि अन्यस्मात् तडागादितः जलं वाञ्छति। चातकपक्षी वृष्टिजलमेव पिबतीति कविसमयः।

अत्र चातकव्याजेन कस्यचित् मनस्विनः प्रशंसा कृतास्ति। मनस्वी जनः कस्यचित् वस्तुनः अभावे प्राणनाशेऽपि क्षुद्रजनस्य पुरतः हस्तं न प्रसारयति। साक्षात् पुरुषोत्तममेव स्वाभिलषितं याचते इति भावः।

**6. अहमस्मि नीलकण्ठस्तव खलु तुष्यामि शब्दमात्रेण।**
**नाहं जलधर! भवतश्चातक इव जीवनं याचे॥**

**अन्वयः** - (हे) जलधर! अहं खलु नीलकण्ठः अस्मि। तव शब्दमात्रेण तुष्यामि। अहं चातक इव भवतः जीवनं न याचे।

**भावार्थः** - अत्र कविः मेघं प्रति कथयति - हे मेघ! अहं खलु मयूरः अस्मि। तव गर्जनमात्रेण एव आनन्दितो भवामि। अहं चातक इव त्वत्तः जीवनं (जलं) न वाञ्छामि। तव शब्दः एव अस्माकमानन्दवर्धक इति

भावः। अत्र केचन निःस्वार्थां प्रीतिं कुर्वन्ति केचन स्वार्थमाश्रित्य स्निह्यन्ति इति मयूरस्य मेघे सहजः स्नेहः, चातकस्यतु हेतुसमन्वितः स्नेहः इति तात्पर्यम्।

7. **एकोऽहमसहायोऽहं कृशोऽहमपरिच्छदः।**

**स्वप्नेऽप्येवंविधा चिन्ता न मृगेन्द्रस्य जायते॥**

**अन्वयः** - अहम् एकः, अहम् असहायः, अहं कृशः, अहम् अपरिच्छिदः (अस्मि), एवंविधा चिन्ता मृगेन्द्रस्य स्वप्नेऽपि न जायते॥

**भावार्थः** - कविः सिंहवृत्तान्तं वर्णयन् कथयति - अहम् एकाकी अस्मि, मम कोऽपि सहायकर्ता नास्ति, अहं दुर्बलः अस्मि, वा अहं बन्धुभिः परिवारेण वा रहितः अस्मि इत्यादिचिन्तां सिंहः कदापि नैव करोति। जगत्यपि ये विक्रमशालिनः, सत्त्ववन्तः, नरशार्दूलाः सन्ति, ते एकाकिनः, असहायाः, बन्धुभिः रहिताः अपि सन्तः चिन्तां न स्वीकुर्वन्ति निर्भया एव भवन्ति इति तात्पर्यम्॥

8. **अहो नक्षत्रराजस्य साभिमानं विचेष्टितम्।**

**परिक्षीणस्य वक्रत्वं सम्पूर्णस्य सुवृत्तता॥**

**अन्वयः** - अहो! नक्षत्रराजस्य विचेष्टितं साभिमानं (वर्तते)। (यत्) तस्य परिक्षीणस्य वक्रत्वम् (स्यात्), सम्पूर्णस्य सुवृत्तता (स्यात्)।

**भावार्थः** - कविः चन्द्रमसं प्रशंसन् कथयति - नक्षत्राधिपस्य चन्द्रस्य विचेष्टितं (कार्यं) सगर्वमस्ति। कारणं- सः परिक्षीणकाले (कृष्णपक्षे) वक्रः भवति। एवं शुक्लपक्षे सम्पूर्णभामण्डला भूत्वा सुवृत्तं करोति, इति भावः। जगत्यपि मानिनो मनुष्याः दुर्बलाः सन्तः वक्रभावं जिह्मतां धारयित्वा शत्रून् दुन्वन्ति। पुनः परिप्राप्तबलाः सन्तः अरीन् सर्वतः अभिभावयन्ति इति भावः।

9. **किं जातोऽसि चतुष्पथे घनतरं छन्नोऽसि किं छायया**

**छन्नश्चेत् फलितोऽसि किं फलभरैराढ्योऽसि किं सन्नतः।**

**हे सद्वृक्ष! सहस्व सम्प्रति सखे! शाखाशिखाकर्षण-**

**क्षोभामोटनभञ्जनानि जनतः स्वैरेव दुश्चेष्टितैः॥**

**अन्वयः** - हे सखे! सद्वृक्ष! किं (त्वं) चतुष्पथे घनतरं जातः असि। किं छायया छन्नः असि। छन्नः (सन् किम्) फलितः असि? किं फलभरैः आढ्यः असि? किं सन्नतः असि? (यद्येवं) चेत् सम्प्रति स्वैरेव दुश्चेष्टितैः जनतः शाखाशिखाकर्षणक्षोभामोटनभञ्जनानि सहस्व।

**भावार्थः** - अस्यामन्योक्तौ कविः वृक्षमुद्दिश्य वदति-

हे मित्र! सद्वृक्ष किं! किं त्वं चतुष्पथे घनतरं यथा स्यात्तथा जातोऽसि? किं त्वं छायया विपुलतया छन्नः असि? छन्नः सन् त्वं किं फलवान् असि? किं त्वं फलभरैः सन्नतः आढ्योऽसि? यदि त्वम् एवंविधः असि चेत् भ्रातः इदानीम् एभिरेव दुष्कर्मभिस्त्वं जनसमुदायद्वारा दीयमानानि शाखाशिखाकर्षणयक्षोभामोटनभञ्जनादीनि दुःखानि सहस्व।

समाजे कुलीनाः, गुणवन्तः, नम्राः, सरलस्वभावाः जनाः स्वगुणकारणादेव दुर्जनैः प्रपीड्यन्ते इति अनया अनयोक्तया द्योत्यते। अथवा कुटिलेषु आर्जवं नीतिः न इति भावः। सारल्यातिरेकः दोषाय भवति।

### शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| **गिराम्** | = वाचाम् | **मोटनम्** | = वक्रतानयनम् | **तुहिनम्** | = हिमम् |
| **मालती** | = पुष्पविशेषः | **मण्डूकाः** | = दर्दुराः | **पुरन्दरः** | = इन्द्रः |
| **छन्नः** | = आच्छादितः | **क्षोभः** | = सञ्चलनम् | | |

### स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) अन्यं प्रति उक्तिः ......... उच्यते। (समासोक्तिः, अन्योक्तिः, विशेषोक्तिः)

(2) अन्योक्तेः अपरं नामधेयम् ......... अस्ति। (अप्रस्तुतप्रशंसा, अप्रस्तुतवाक्यम्, प्रत्युक्तिः)

(3) शुकस्य बन्धनस्य कारणं ......... जातम्। (मधुरध्वनिः, व्याधः, जालम्)

(4) ......... गुणवद्रिक्तपात्राणि पूर्णतां प्राप्नुवन्ति। (समुद्रतः, कूपतः, भ्रमरतः)

(5) खगेषु एकः एव मानी ......... अस्ति। (शुकः, हंसः, चातकः)

(6) छायया छन्नः ......... अस्ति। (वृक्षः, शुकः, मधुकरः)

(7) करिकराकारः ......... विशेषणम्। (वृक्षस्य, शुकस्य, सर्पस्य)

(8) नक्षत्रराजः ......... अस्ति। (मण्डूकः, वृक्षः, चन्द्रः)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) शुकस्य मधुराणां गिरां फलं किम्?

(2) ''करीरद्रुमस्य कुसुमेषु विचर'' इति कविः कस्मै कथयति?

(3) कः पिपासायां पुरन्दरं याचते?

(4) स्वल्पतोये बहुव्ययः कोऽस्ति?

**3. द्वित्रिवाक्यैः उत्तरं लिखत।**

(1) अन्योक्तिः अर्थात् किम्?

(2) कविः मधुकरं प्रति किं कथयति?

(3) कविः सद्वृक्षं प्रति किं कथयति?

**4. सविस्तरम् उत्तरं लिखत।**

(1) तावद् गर्जन्ति मण्डूकाः ......... इत्यस्य भावार्थो लेख्यः।

(2) मृगेन्द्रस्य किंविधा चिन्ता न जायते? कथम्?

(3) वृक्षान्योक्तौ कविः वृक्षं प्रति किं कथयति?

(4) अहो नक्षत्रराजस्य ........ इत्यस्य सान्वयं भावार्थं लिखत।

**5. सूचनानुसारं कुरुत।**

**(क) विभक्तिपरिचयो देयः।**

(1) अखिलेषु (2) मण्डूकाः (3) अहम्

(4) जातः (5) दुश्चेष्टितैः

**(ख) सन्धिविच्छेदं कुरुत।**

(1) अप्यस्ति (2) पञ्जरबन्धस्ते (3) कूपमाश्रित्य

(4) भवतश्चातक इव (5) जातोऽसि

**(घ) सन्धिं कुरुत।**

(1) अन्य + उक्तिः (2) शुकम् + उद्दिश्य (3) तस्य + एव

(4) तावत् + एव (5) स्वप्ने + अपि

**(घ) धातुपरिचयो देयः।**

(1) जीवतु (2) म्रियते (3) सहस्व

(4) तुष्यामि (5) मिलति

**छात्रप्रवृत्तिः**

छात्राः वर्गखण्डे अन्योक्तीनां भावचित्रं कृत्वा वर्गभित्तिषु स्थापयेयुः।

**अध्यापकप्रवृत्तिः**

अन्याः प्रेरणादायिकाः अन्योक्तीः छात्रेभ्यः ज्ञापयेयुः, प्रेरणां च दद्युः।

●

# ७

# दत्तात्रेयस्य गुरवः

**प्रस्तावना**

''व्यासोच्छिष्टं जगत्सर्वम्'' को न जानति कृष्णद्वैपायनं महर्षिव्यासम् यतोऽत्रभवान् हि सः अष्टादश पुराणानि विरच्य संसारस्य समस्तजीवानां महदुपाकरोत्। तेष्वेवाष्टादशपुराणेषु चान्यतमं विद्यते श्रीमद्‌भागवतमहापुराणम्। सर्वजनोपास्यमिदं सर्वथा मोक्षदायकं वर्तते। अस्य एकादशस्कन्धे सप्तमाध्यायतः नवमाध्यायपर्यन्तं त्रिष्वध्यायेषु अवधूतस्य दत्तात्रेयस्य प्रसङ्गो वर्णितः। तदनुसारं बालवत् निर्भीकतया विचरन्तं प्रसन्नवदनं दत्तात्रेयं दृष्ट्वा धर्ममर्मज्ञः राजा यदुः तस्य यथोचितं सत्कारं कृत्वा विनम्रभावेन चापृच्छत् - भवतः अनिर्वचनीयानन्दस्य कारणं किम्? तदा भगवान् दत्तात्रेयः तस्मै स्वस्य चर्तुर्विंशतिगुरूणां विषये यदुपदिष्टवान् तदेवात्र प्रस्तूयते।



समान्यतया लोकेऽस्मिन् प्रत्येकं जनस्य जीवने गुरुर्भवत्येव, यः अज्ञानतमो विदीर्य स्वशिष्याय ज्ञानज्योतिः प्रयच्छति। भगवान् दत्तात्रेयः प्रकृतेः चेतनाचेतनतत्त्वेभ्यः चतुर्विंशति-गुरून् उपाश्रयत्। तेभ्यः विविधविषयाणां ज्ञानं समुपलभ्य आत्मसाधनया अवधूतपदं च प्राप्नोत्। अत्र एकादशस्कन्धे सप्तमेऽध्याये चतुर्विंशतिगुरूणां नामपुरःसरम् अष्टानां गुरूणां कथाप्रसङ्गः समायाति। प्रदत्तपाठेऽस्मिन् तेभ्यः 32 तः 51 श्लोकपर्यन्तं पृथिवी, वायुः, आकाशम्, आपः, अग्निः, चन्द्रमाः रविः चेति सप्तानां गुरूणां विषये प्रतिपादितं वर्तते। पाठेनानेन बोद्धव्यं यत् ज्ञानप्राप्तिहेतवे गुरुः केवलं मनुष्यः स्यादिति नावश्यकम्। ज्ञानप्राप्तिस्तु यतः कुतश्चिदपि भवितुं शक्नोतीति सारः।

**दत्तात्रेय उवाच**

1. **सन्ति मे गुरवो राजन् बहवो बुद्ध्युपाश्रिताः।**
   **यतो बुद्धिमुपादाय मुक्तोऽटामीह ताञ्छृणु॥ 11.7.32॥**

**अन्वयः** - राजन्! बुद्ध्युपाश्रिताः मे बहवः गुरवः सन्ति, यतः बुद्धिम् उपादाय इह मुक्तः (सन्) अटामि तान् श्रुणु।

**भावार्थः** - हे राजन्! मया स्वीयया बुद्ध्या मम जीवने अनेके गुरवः उपाश्रिताः सन्ति। तेभ्यः शिक्षां गृहीत्वा अहं संसारेऽस्मिन् स्वच्छन्दतया मुक्तभावेन च विचरणं करोमि। तेषां नामानि तेभ्यः च गृहीतस्य शिक्षणस्य विषये त्वं श्रुणु।

2. **पृथिवी वायुराकाशमापोऽग्निश्चन्द्रमा रविः।**
   **कपोतोऽजगरः सिन्धुः पतङ्गो मधुकृद् गजः॥ 11.7.33॥**

**अन्वयः** - पृथिवी, वायुः, आकाशम्, आपः अग्निः, चन्द्रमाः, रविः, कपोतः, अजगरः, सिन्धुः, पतङ्गः, मधुकृद् गजः (च सन्ति)॥

**भावार्थः** - मम गुरूणां नामानि सन्ति यथा - पृथ्वी, पवनः, नभः, जलम्, वह्निः, निशाकरः, सूर्यः, कपोतः, अजगरः, समुद्रः, शलभः, भ्रमरः, (मधुमक्षिका) हस्ती च इति।

3. **मधुहा हरिणो मीनः पिङ्गला कुररोऽर्भकः।**
**कुमारी शरकृत् सर्प ऊर्णनाभिः सुपेशकृत्॥ 11.7.34॥**

**अन्वयः** – मधुहा, हरिणः, मीनः, पिङ्गला, कुररः, अर्भकः, कुमारी, शरकृत्, सर्पः, ऊर्णनाभिः सुपेशकृत् च।

**भावार्थः** – (अपि च) मधुहा, मृगः मत्स्यः, पिङ्गला गणिका, कुररो नाम खगः, शिशुः, कुमारिका कन्या, शरकृत् सर्पः, ऊर्णनाभिः, भृङ्गी नाम कीटः च। इमे सर्वेऽपि मम गुरवः सन्तीति भावः।

4. **एत मे गुरवो राजंश्चतुर्विंशतिराश्रिताः।**
**शिक्षां वृत्तिभिरेतेषामन्वशिक्षमिहात्मनः ॥ 11.7.35॥**

**अन्वयः** – हे राजन्! एते चतुर्विंशतिः गुरवः मे आश्रिताः, तेषां वृत्तिभिः इह आत्मनः शिक्षाम् अन्वशिक्षम्।

**भावार्थः** – हे राजन्! मया एते चतुर्विंशतिः गुरवः आश्रिताः सन्ति, येषां आचरणेन एव अहं संसारेऽस्मिन् आत्मनः शिक्षां गृहीतवान् अस्मि इति भावः।

5. **यतो यदनुशिक्षामि यथा वा नाहुषात्मज।**
**तत्तथा पुरुषव्याघ्र निबोध कथयामि ते॥ 11.7.36॥**

**अन्वयः** – नाहुषात्मज! यतः यत् यथा वा अनुशिक्षामि, पुरुषव्याघ्र! तत् तथा ते कथयामि (त्वं) निबोध।

**भावार्थः** – हे ययातिनन्दन! अहं यस्मात् गुरोः यत् ज्ञानं येन प्रकारेण च अधीतवान्, हे पुरुषव्याघ्र! तत् ज्ञानं तथा एव तुभ्यं कथयामि त्वं शृणु।

6. **भूतैराक्रम्यमाणोऽपि धीरो दैववशानुगैः।**
**तद् विद्वान्न चलेन्मार्गादन्वशिक्षं क्षितेर्व्रतम्॥ 11.7.37॥**

**अन्वयः** – दैववशानुगैः भूतैः आक्रम्यमाणः अपि धीरः विद्वान् मार्गात् न चलेत्, क्षितेः तत् व्रतम् अन्वशिक्षम्।

**भावार्थः** – अहं पृथिव्याः धैर्यस्य क्षमायाश्च शिक्षां गृहीतवान्। जनाः पृथिव्यां किं किं न आक्रमन्ते किन्तु तथापि सा न वदति न वा रोदिति। इह सर्वे प्राणिनः स्व-प्रारब्धानुसारं व्यवहरन्ति। कदाचित् ते जानन्नजानन् अपि विभिन्नेन प्रकारेण भूमौ आक्रमणं कुर्वन्ति। धीरपुरुषः तेषां विवशताम् अवगत्य न धैर्यं त्यजेत् न वा क्रोधम् आप्नुयात्। स च स्वमार्गात् एकं पदमपि न विचलेत्।

7. **शश्वत्परार्थसर्वेहः परार्थैकान्तसम्भवः।**
**साधुः शिक्षेत भूभृतो नगशिष्यः परात्मताम्॥ 11.7.38॥**

**अन्वयः** – शश्वत्परार्थसर्वेहः परार्थैकान्तसम्भवः नगशिष्यः साधुः भूभृतः परात्मतां शिक्षेत।

**भावार्थः** – अहं पृथिव्याः एव कलितात् पर्वतात् वृक्षात् च परोपकारस्य शिक्षां गृहीतवान्। यथा पर्वतानां वृक्षाणां च सर्वाः चेष्टाः सदैव परोपकाराय भवन्ति, अथ च तेषां जन्म एव परोपकारार्थं भवति तथा साधुजनः अपि तच्छिष्यत्वं स्वीकृत्य परोपकारं कुर्यात् इति।

8. **प्राणवृत्त्यैव सन्तुष्येन्मुनिर्नैवेन्द्रियप्रियैः।**
**ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः॥ 11.7.39॥**

**अन्वयः** – मुनिः प्राणवृत्या एव सन्तुष्येत् इन्द्रियप्रियैः न एव। यथा ज्ञानं न नश्येत न (च) वाङ्मनः अवकीर्येत।

**भावार्थः** – अहं शरीरस्थात् प्राणवायोः सन्तोषस्य शिक्षां गृहीतवान्। यथा प्राणवायुः आहारमात्रम् इच्छति तत्प्राप्त्या च सन्तुष्टो भवति, न तु इन्द्रियप्रियैः भोजनैः सन्तुष्यति तथा एव साधुः अपि जीवननिर्वाहार्थं यावदावश्यकं तदेव स्वीकुर्यात्। अर्थात् तेषामेव विषयाणां संगतिं कुर्यात् यैः ज्ञानं नष्टं न स्यात्, मनः चञ्चलं न स्यात् वाणी च वृथा न सञ्जायेत।

9. **विषयेष्वाविशन् योगी नानाधर्मेषु सर्वतः।**
**गुणदोषव्यपेतात्मा न विषज्जेत वायुवत्॥ 11.7.40॥**

**अन्वयः** – वायुवत् नानाधर्मेषु विषयेषु सर्वतः आविशन् गुणदोषव्यपेतात्मा योगी न विषज्जेत।

**भावार्थः** - अहं वायोः निरासक्तेः वैराग्यस्य वा शिक्षां गृहीतवान्। यथा वायुः अनेकानि स्थलानि गच्छति किन्तु कुत्रचिद् अपि आसक्तो न भवति। अर्थात् कस्यचिदपि वस्तुनः गुणान् दोषान् वा न स्वीकारोति तथैव गुणदोषव्यपेतात्मा भूत्वा योगी अपि आवश्यकतानुसारं विभिन्नधर्मेषु विषयेषु गतिं कुर्यात् किन्तु स्वलक्ष्यम् एव साधयेत्। लक्ष्यं विहाय कस्यचित् गुणान् दोषान् वा प्रति आसक्तिं द्वेषं वा न कुर्यात् इति भावः।

10. **पार्थिवेष्विह देहेषु प्रविष्टस्तदगुणाश्रयः।**
**गुणैर्न युज्यते योगी गन्धैर्वायुरिवात्मदृक् ॥ 11.7.41॥**

**अन्वयः** - इह पार्थिवेषु देहेषु प्रविष्टः तद्गुणाश्रयः आत्मदृक् योगी गन्धैः वायुः इव गुणैः न युज्यते।

**भावार्थः** - अहं वायोः अलिप्ततायाः शिक्षां गृहीतवान्। गन्धवत्त्वं न वायोः गुणः, स तु पृथिव्याः गुणो वर्तते। तथापि वायुः गन्धं निर्वहति। गन्धं निरूह्यापि स तु शुद्धः एव तिष्ठति। तथैव आत्मदृक् योगी अपि यावत् अस्मिन् संसारे पार्थिवेन देहेन सह सम्बन्धो भवति तावत् क्षुत्पिपासाजरादीन् निर्वहेत किन्तु शरीरात् तद्गुणाश्रयत्वात् च निर्लेपः सन् संसारे निवसेत्।

11. **अन्तर्हितश्च स्थिरजङ्गमेषु ब्रह्मात्मभावेन समन्वयेन।**
**व्याप्त्याव्यवच्छेदमसङ्गमात्मनो मुनिर्नभस्त्वं विततस्य भावयेत्॥ 11.7.42॥**

**अन्वयः** - (आत्मा) स्थिरजङ्गमेषु ब्रह्मात्मभावेन समन्वयेन च अन्तर्हितः (भवति)। मुनिः विततस्य आत्मनः व्याप्त्या (तं) अव्यवच्छेदं असङ्गम् (च) नभस्त्वं भावयेत्।

**भावार्थः** - राजन्! यथा भिन्नरूपाकारगुणेषु घटादिपदार्थेषु वस्तुतः आकाशम् एकम् अपरिच्छिन्नं च भवति। तथा एव चराचरेषु सूक्ष्मस्थूलशरीरेषु आत्मरूपेण समन्वयेन ईश्वरः सर्वत्र व्याप्तः अन्तर्हितश्च भवति। मुनिः तत्र विततस्य आत्मनः अखण्डत्वम् असङ्गत्वं च एव पश्येत्। अर्थात् विततस्य आत्मनः आकाशवत् व्याप्तत्वात् मुनिः तत्र नभस्त्वं भावयेत् इति।

12. **तेजोऽबन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः।**
**न स्पृश्यते नभस्तद्वत् कालसृष्टैर्गुणैः पुमान्॥ 11.7.43॥**

**अन्वयः** - तेजोऽबन्नमयैः भावैः वायुना ईरितैः मेघाद्यैः नभः न स्पृश्यते, तद्वत् पुमान् कालसृष्टैः गुणैः (न स्पृश्यते)।

**भावार्थः** - वह्निः प्रज्वलति, जलं वर्षति, अन्नम् उत्पद्यते नश्यते च, वायुना प्रेरिताः मेघादयः आयान्ति यान्ति च। एतैः सर्वैः भावैः अपि आकाशं न स्पृश्यते। आकाशदृष्ट्या तु एतेषां अस्तित्वं एव न भवति। तथैव भूत–वर्तमान–भविष्यादिकालसृष्टैः सृष्टिप्रलयादिगुणैः आत्मा नभोवत् न स्पृश्यते इति।

13. **स्वच्छः प्रकृतितः स्निग्धो माधुर्यस्तीर्थभूर्नृणाम्।**
**मुनिः पुनात्यपां मित्रमीक्षोपस्पर्शकीर्तनैः॥ 11.7.44॥**

**अन्वयः** - प्रकृतितः स्वच्छः, स्निग्धः, माधुर्यः, नृणां तीर्थभूः मुनिः अपां मित्रं (भवति यः) ईक्षोपस्पर्श–कीर्तनैः पुनाति।

**भावार्थः** - यथा जलं स्वभावेन स्वच्छं, स्निग्धं, मधुरं नृणां पावनं च भवति तथैव मुनिः अपि जलस्य मित्रमेव वर्तते। सः अपि जलम् इव स्वभावेन शुद्धः, स्नेहशीलः, मधुरभाषी लोकपावनः च भवेत्। स्वकीयेन दर्शनेन, स्पर्शेन भगवन्नामसंकीर्तनेन च जनान् पावयेत् इति भावः।

14. **तेजस्वी तपसा दीप्तो दुर्धर्षोदरभाजनः।**
**सर्वभक्षोऽपि युक्तात्मा नादत्ते मलमग्निवत्॥ 11.7.45॥**

**अन्वयः** - तेजस्वी, तपसा दीप्तः दुर्धर्षोदरभाजनः, सर्वभक्षः (सन्) अपि युक्तात्मा अग्निवत् मलम् न आदत्ते।

**भावार्थः** - राजन्! अहं अग्नेः एतत् अन्वशिक्षम् यत्–अग्निः यथा तेजोवान्, तपसा दीप्तः दुर्धर्षोदरपात्रः सर्वभक्षः सन् अपि तद्दोषान् न अवधारयति तथैव योगी अपि परमतेजस्वी, स्वतपसा देदीप्यमानः, इन्द्रियैः अपराभूतः, भोजनमात्रस्य संग्रही, यथायोग्यं विषयोपभोगी च सन्नपि अग्निः इव तद्विषयदोषान् नावधारयेत्। स्वमनः इन्द्रियाणि च वशीकुर्यादिति भावः।

15. **क्वचिच्छन्नः क्वचित् स्पष्ट उपास्यः श्रेय इच्छताम्।**
**भुङ्क्ते सर्वत्र दातॄणां दहन् प्रागुत्तराशुभम्॥ 11.7.46॥**

**अन्वयः** - क्वचित् छन्नः क्वचित् स्पष्टः श्रेयः इच्छताम् उपास्यः, दातॄणाम् प्रागुत्तराशुभं दहन् सर्वत्र भुङ्क्ते।

**भावार्थः** - यथा अग्निः कुत्रचित् (काष्ठादिषु) अप्रकटः भवति कुत्रचित् प्रकटः भवति, कुत्रचित् च स्वकल्याणम् इच्छतां जनानां कृते उपास्यः च भवति। स च दातॄणां सर्वमपि हविद्रव्यं स्वीकरोति। तथैव मुनिः अपि क्वचित् उपस्थितः अनुपस्थितो वा सन् कल्याणकामानां जनानां कृते उपास्यः स्यात्। सः अग्निः इव भिक्षाहवनकर्तॄणां पूर्वोत्तरम् अशुभं भस्म कुर्वन् सर्वत्र अन्नग्रहणं कुर्यात् इति भावः।

16. **स्वमायया सृष्टमिदं सदसल्लक्षमं विभुः।**
**प्रविष्ट ईयते तत्तस्वरूपोऽग्निरिवैधसि॥ 11.7.43॥**

**अन्वयः** - स्वमायया सृष्टम् इदं सदसल्लक्षणं प्रविष्टः विभुः एधसि अग्निः इव तत्तस्वरूपः ईयते।

**भावार्थः** - यथा अग्निः काष्ठादिषु इन्धनेषु तिष्ठन् तत्-तत्-स्वरूपः, प्रतीयते किन्तु वस्तुतः तादृशो न भवति, तथैव सर्वव्यापको आत्मा अपि जगति मायया सृष्टं कार्यकारणरूपं सदसद्वस्तु प्रविष्टः सन् अपि तत्-तत्-स्वरूपः प्रतीयते किन्तु वस्तुतः तत्तद्वस्तुनामभिः सम्बद्धो न जायते।

17. **विसर्गाद्याः श्मशानान्ता भावा देहस्य नात्मनः।**
**कलानामिव चन्द्रस्य कालेनाव्यक्तवर्त्मना॥ 11.7.48॥**

**अन्वयः** - अव्यक्तवर्त्मना कालेन चन्द्रस्य कलानाम् इव विसर्गाद्याः श्मशानान्ताः भावाः देहस्य (भवन्ति) आत्मनः न।

**भावार्थः** - अहं चन्द्रमसः एतत् अन्वशिक्षं यत् अव्यक्तवर्त्मना अव्यक्तगतिना वा कालेन यथा चन्द्रस्य कलाः वर्धन्ते क्षीयन्ते, परन्तु चन्द्रमा न क्षीयते न च वर्धते, तथैव जन्मनः मृत्युपर्यन्तं याः अवस्थाः भवन्ति ताः तु केवलं शरीरस्य भवन्ति। आत्मना सह तासां अवस्थानां न कोऽपि सम्बन्धो भवतीति भावः।

18. **कालेन ह्योघवेगेन भूतानां प्रभवाप्ययौ।**
**नित्यावपिन दृश्येते आत्मनोऽग्नेर्यथार्चिषाम्॥ 11.7.49॥**

**अन्वयः** - ओघवेगेन हि कालेन भूतानां नित्यौ अपि प्रभवाप्ययौ न दृश्येते, यथा अग्नेः अर्चिषा (इव) आत्मनः (तथा)।

**भावार्थः** - यथा अग्नेः अर्चिषां प्रतिक्षणम् उत्पत्तिः विनाशश्च जायेते, एषः क्रमः निरन्तरं प्रचलति किन्तु दृष्टिपथं न समायाति, तथा एव जलप्रवाहसमेन वेगवता कालेन शरीराणां प्रभवविनाशौ भवतः किन्तु तत्र अज्ञानवशात् आत्मा न दृश्यते इति।

19. **गुणैर्गुणानुपादत्ते यथाकालं विमुञ्चति।**
**न तेषु युज्यते योगी गोभिर्गा इव गोपतिः॥ 11.7.50॥**

**अन्वयः** - गोपतिः (स्वस्य) गोभिः गाः इव, योगी गुणैः गुणान् उपादत्ते यथाकालं विमुञ्चति (परं) तेषु न युज्यते।

**भावार्थः** - हे राजन्! अहं भास्करात् शिक्षां गृहीतवान् यत् यथा भास्करः स्वकिरणैः पृथिव्याः जलम् अपकर्षति यथासमयं वर्षाकाले तत् जलं वर्षति, किन्तु सः तत्र न युज्यते तथैव संयतेन्द्रियः योगी पुरुषः इन्द्रियैः यथाकालं विषयान् गृह्णाति किन्तु समये आगते सति तद्दानम् अपि कुर्यात्। इन्द्रियविषयेषु आसक्तिं न कुर्यात् इति भावः।

20. **बुध्यते स्वे न भेदेन व्यक्तिस्थ इव तद्गतः।**
**लक्ष्यते स्थूलमतिभिरात्मा चावस्थितोऽर्कवत्॥ 11.7.51॥**

**अन्वयः** - व्यक्तिर्णस्थः (सूर्यः) तद्गतः इव भेदेन लक्ष्यते, स्थूलमतिभिः अर्कवत् स्वे अवस्थितः आत्मा च न बुध्यते।

**भावार्थः** - स्थूलबुद्धयः जनाः यथा विभिन्नेषु जलपात्रेषु प्रतिबिम्बितं सूर्यं भिन्नं भिन्नं पश्यन्ति, किन्तु अनेन सूर्यस्य अनेकत्वं न सिध्यति। सः तु एक एवास्ति। तथैव प्रत्येकस्मिन् जीवे आत्मा भिन्नः भिन्नः अस्तीति प्रतीयते, किन्तु एवं नास्ति। आत्मा तु सूर्यवत् एक एवास्तीति भावः।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| **आपः** | = जलम् | **स्निग्धः** | = स्नेहयुक्तः | **मधुकृद्** | = भ्रमरः |
| **भाजनम्** | = पात्रम् | **पिङ्गला** | = तन्नाम्नी गणिका | **एधसि** | = इन्धने |
| **पतङ्गः** | = शलभः | **ईयते** | = प्रतीयते | **अर्भकः** | = शिशुः |
| **वर्त्म** | = पन्थाः | **नाहुषात्मजः** | = ययातिनन्दनः। | **ओघः** | = प्रवाहः |
| **भूतैः** | = प्राणिभिः | **अप्ययः** | = विनाशः | **दैववशानुगैः** | = भाग्याधीनैः |
| **अर्चिषाम्** | = ज्योतिषाम् | **भूभृत्** | = नगः / पर्वतः | **गोपतिः** | = सूर्यः |
| **विततः** | = विस्तृतः | **लक्ष्यते** | = दृश्यते | | |

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) दत्तात्रेयः गुरुभ्यः ......... उपादाय मुक्तः अटति। (बुद्धिम्, वृद्धिम्, सिद्धिम्)

(2) ......... इति 'अर्भक' शब्दस्य पर्यायः। (शलभः, शिशुः, स्थविरः)

(3) दत्तात्रेयस्य ......... गुरवः आसन्। (द्वाविंशतिः, त्रयोविंशतिः, चतुर्विंशतिः)

(4) ......... मार्गात् न विचलेत्। (धीरः, स्थविरः, वीरः)

(5) गुणदोषव्यपेतात्मा ......... न विषज्जेत। (भोगी, योगी, निरोगी)

(6) पुमान् ......... गुणैः न स्पृश्यते। (कालसृष्टैः, ज्ञानसृष्टैः, मायासृष्टैः)

(7) युक्तात्मा ......... मलं न आदत्ते। (वायुवत्, अग्निवत्, जलवत्)

(8) मुनिः ईक्षोपस्पर्शकीर्तनैः .........। (जानाति, अश्नाति, पुनाति)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) प्रकृतितः किं स्वच्छं भवति?

(2) कैः आत्मा न बुध्येत?

(3) केषां प्रभवाप्ययौ नित्यावपि न दृश्येते?

(4) अग्निः दातॄणां किं दहन् सर्वत्र भुङ्क्ते?

(5) मार्गात् न चलेत् इति कस्य व्रतम्?

**3. द्वित्रिवाक्यैः उत्तरं लिखत।**

(1) नगशिष्यः साधुः किं शिक्षेत?

(2) मुनिः कया एव सन्तुष्येत् किमर्थं च?

(3) आत्मदृक् योगी कमिव गुणैः न युज्यते?

(4) जलं प्रकृतितः कीदृशं भवति?

(5) योगी केषु कथं च न युज्यते?

**4. सविस्तरम् उत्तरं लिखत।**

(1) दत्तात्रेयस्य कति गुरवः के च ते?

(2) 'लक्ष्यते स्थूलमतिभिः आत्मा चावस्थितोऽर्कवत्' इति व्याख्यायताम्।

(3) गुरुदत्तात्रेयः अग्नेः किं किं शिक्षितवान्? इति सविस्तरं प्रतिपादयत।

(4) मनुष्यः किमर्थम् आत्मनः नभस्त्वं भावयेत्?

**5. प्रदत्तसूचनानुसारं कुरुत।**

**(क) अ विभागं ब विभागेन सह योजयत।**

| अ | | ब |
|---|---|---|
| (1) तद्विद्वान्न चलेन्मार्गात् | - | जलम् |
| (2) प्राणवृत्त्यैव सन्तुष्येत् | - | सूर्यः |
| (3) कालसृष्टैर्गुणैः पुमान् | - | अग्निः |
| (4) माधुर्यस्तीर्थभूर्नृणाम् | - | क्षितिः |
| (5) सर्वभक्षोऽपि युक्तात्मा | - | चन्द्रमाः |
| (6) विसर्गाद्याः श्मशानान्ताः भावाः | - | नभः |
| (7) गोभिर्गा इव गोपतिः | - | वायुः |

**(ख) विभक्तिपरिचयो देयः।**

(1) ऊर्णनाभिः (2) गन्धैः (3) अन्नमयैः

(4) अपाम् (5) शुभम् (6) नित्यौ

**(ग) सन्धिविच्छेदं कुरुत।**

(1) चावस्थितोऽर्कवत् (2) गन्धैर्वायुः (3) तेजोऽन्नमयैः

(4) पुनात्यपाम् (5) प्रागुत्तराशुभम् (6) नित्यावपि

**(घ) सन्धिं कुरुत।**

(1) मुक्तः + अटामि (2) अग्निः + चन्द्रमाः (3) इह + आत्मनः

(4) चलेत् + मार्गात् (5) प्राणवृत्या + एव (6) पार्थिवेषु + इह

**(ङ) धातुपरिचयो देयः।**

(1) अटामि (2) अन्वशिक्षम् (3) चलेत् (4) आदत्ते (5) पुनाति (6) स्पृश्यते

**(च) समासपरिचयो देयः।**

(1) पुरुषव्याघ्रः (2) नगशिष्यः (3) आत्मदृक्

(4) कालसृष्टैः (5) प्रभवाप्ययौ (6) यथाकालम्

**छात्रप्रवृत्तिः**

छात्राः स्वजीवने अपि प्रकृतेः अन्यैः कैः पदार्थैः किं किं च ज्ञातुं शक्नुवन्ति इति सोदाहरणं वर्णयन्तु।

**अध्यापकप्रवृत्तिः**

अध्यापकाः श्रीमद्भागवतमहापुरणानुसारं पाठेऽवशिष्टानां अन्येषामपि दत्तात्रेयस्य गुरूणां चर्चां कुर्युः।

●

# ८

# किञ्चिद् हसामः

**प्रस्तावना**

विपुलेऽस्मिन् संस्कृतसाहित्ये मुख्यतया नवरसाः प्रतिपादिताः। विभिन्नेषु ग्रन्थेषु मुख्य-रूपेण एको रसो भवति। यथा अभिज्ञानशाकुन्तले मुख्यरूपेण शृङ्गाररसः, उत्तररामचरिते करुणरसः मुख्यरूपेण विद्यते। तदनुसारेण अस्माकं संस्कृतशास्त्रेषु विभिन्नाः रसाः समुपलभ्यन्ते। तेषु नवरसेषु हास्य-रसोऽपि विद्यते। सर्वेषां जनानां विनोदाय तथा चिन्ता-निवारणाय रसोऽयम् आवश्यकः एव।

यथा नाटके नायकस्य महत्त्वम् अस्ति तथा नाटके विदूषकस्यापि महत्त्वं नायकवत् एव अस्ति। विदूषकः हास्यरसेन लालित्यं प्रथयति। सुभाषितकल्पतरुग्रन्थे हास्यप्रकरणे तथा च सुभाषितरत्नभाण्डागारे हास्यनिर्देशे हास्यरससमलङ्कृताः केचित् श्लोकाः निर्दिष्टाः सन्ति। तेभ्यः केचन श्लोकाः पाठेऽस्मिन् संगृहीताः सन्ति।

1. **अन्धं दरिद्रमथ च प्रियया विहीनं**
**वीक्ष्येश्वरो वदति याच वरं त्वमेकम्।**
**नेत्रे च वापि वसु नो वनितां स वव्रे**
**छत्राभिरामसुतदर्शनमित्युवाच॥ 1॥**

**अन्वयः** -अन्धं, दरिद्रम् अथ प्रियया विहीनं च (जनं) वीक्ष्य ईश्वरः वदति - ''त्वम् एकं वरं याच।'' सः (जनः) नेत्रे, वसु वनितां वापि च नो वव्रे छत्राभिरामसुतदर्शनम् (मह्यं ददातु) इति उवाच॥

**भावार्थः** - एकदा भगवान् एकं नेत्रविहीनम्, धनविहीनम्, भार्याविहीनं नरं पश्यति। करुणावरुणालयः भगवान् तं जनं प्रति कथयति - ''त्वं मत् एकं वरं याचस्व'' भगवतो वचनम् आकर्ण्य सः जनः विचारमग्नः संजातः। कारणं तेन एकेन वरेण नेत्रे, धनम्, वित्तम्, युगपदेव याचनीयमासीत्। किन्तु सः चतुरः आसीत् अतः विचार्य एवं याचितवान् - हे भगवन्! ''अहं छत्राभिरामसुतदर्शनं चिकीर्षामि।'' ''अनेन एकेन एव वरेण नेत्रे, वित्तं, भार्या च इति समस्तम् एव याचितं (सुत इत्यनेन भार्या, छत्राभिरामसुत-द्वारा धनं, दर्शनद्वारा च नेत्रे याचिते।'' इति तस्य जनस्य चातुर्यं दृष्ट्वा भगवान् हसता मुखेन तस्मै यथाभिलषितं दत्तवान्।

2. **आकर्ण्य भूपाल! यशस्त्वदीयं**
**विधूनयन्तीह न के शिरांसि।**
**विश्वंभराभङ्गभयेन धात्रा**
**नाकारि कर्णौ भुजगेश्वरस्य॥ 2॥**

**अन्वयः** -भूपाल! त्वदीयं यश आकर्ण्य इह के शिरांसि न विधूनयन्ति। (अतः एव) विश्वंभराभङ्गभयेन धात्रा भुजगेश्वरस्य कर्णौ नाकारि॥

**भावार्थः** - श्लोकेऽस्मिन् कश्चित् कञ्चन राजानं प्रशंसति हे राजन्! त्वदीयां कीर्तिम् आकर्ण्य के जनाः हर्षमग्नाः भूत्वा स्वशिरांसि न विधूनयन्ति? सर्वेऽपि विधूनयन्ति इत्यर्थः (हर्षवेलायां शिरोविधूननं लोके प्रचलितम् अस्ति) यदि शेषनागः तव गुणकीर्तिश्रवणेन सोऽपि स्वशिरः विधूनयेत् तदा तस्योपरि स्थितस्य विश्वस्य अधः पतनात् भङ्गो भविष्यति। अतः भाग्यविधाता सर्पराजाय शेषनागाय कर्णौ न दत्तवान् इति भावः।

3. **हा हा दद्यात् हु हु दद्यात् दद्यात् तर्जनी तर्जनी।**

**हुंकारेण पुनर्दद्यात् न दद्यात् सिंहगर्जनैः॥ 3॥**

**अन्वयः** -हा हा दद्यात् हु हू दद्यात् तर्जनी तर्जनी दद्यात्।

दद्यात् हुंकारेण पुनः दद्यात् सिंहगर्जनैः न दद्यात्॥

**भावार्थः** - यदि भोजनकर्ता हा हा इति वदेत् तर्हि परिवेषणं कर्तव्यम्। हु हू इति वदेत् तदापि दातव्यम्। तर्जन्या निदर्शनेऽपि दद्यात्। पुनः हुंकारेण कथयेत् चेदपि दद्यात् परन्तु सिंहगर्जनां यदा करोति तदा कदापि परिवेषणं न कर्तव्यम् अन्यथा स्वप्राणतः हस्तौ प्रक्षालनीयौ भविष्यतः इति।

4. **किं वाससा तत्र विचारणीयं?**

**वासः प्रधानं खलु योग्यतायाः।**

**पीताम्बरं वीक्ष्य ददौ स्वकन्यां**

**चर्माम्बरं वीक्ष्य विषं समुद्रः॥ 4॥**

**अन्वयः** -वाससा किम्? तत्र विचारणीयम्। वासः खलु योग्यतायाः प्रधानम् (अस्ति)।

समुद्रः पीताम्बरं वीक्ष्य स्वकन्यां (ददौ) चर्माम्बरं वीक्ष्य विषं ददौ॥

**भावार्थः** - वस्त्रपरिधाने किं विचारणीयं भवति? परन्तु योग्यतायाः प्रधानं खलु वस्त्रम् एव अस्ति। कारणं समुद्रः पीताम्बरं विष्णुं दृष्ट्वा, तस्मै स्वकन्यायाः हस्तं दत्तवान् किन्तु चर्माम्बरं भूतपतिम् आलोक्य तस्मै विषं दत्तवान्। वाससि एव खलु योग्यता भवति इति अस्य श्लोकस्य तात्पर्यम्।

5. **कृपणेन समो दाता न भूतो न भविष्यति।**

**अस्पृशन्नेव वित्तानि यः परेभ्यः प्रयच्छति॥ 5॥**

**अन्वयः** -कृपणेन समः दाता न भूतो न भविष्यति। यः वित्तानि अस्पृश्यन्नेव परेभ्यः प्रयच्छति॥

**भावार्थः** - कृपणः आजीवनं धनस्य संग्रहम् एव करोति। धनम् अन्येभ्यः न ददाति, स्वयं च नोपभुङ्क्ते। अतः तत् धनं सः अस्पृशन् नाम उपभोगं विनैव अन्येभ्यः ददाति। तस्य मृत्योः पश्चात् तद् धनं अन्ये उपयुञ्जते इति तात्पर्यम्।

6. **शृणु सखि चतुरो मे भर्ता**

**यत्स लिखति परो न वाचयति।**

**तस्मादधिको मे भर्त्ता स्वयमपि**

**लिखितं स्वयं न वाचयति॥ 6॥**

**अन्वयः** -हे सखि! शृणु मे भर्ता चतुरः (अस्ति) सः यत् लिखति परः न वाचयति। तस्मादधिको मे भर्ता (अस्ति) स्वयं लिखितमपि स्वयं न वाचयति।

**भावार्थः** - द्वे सख्यौ स्वपत्योर्लेखनशक्तेः प्रशंसां कुर्वन्त्यौ आस्ताम्। एका सखी वदति - हे सखि! शृणोतु मम भर्ता अतिबुद्धिमान् अस्ति। सः यत् लिखति, परजनः तस्य वाचनं कर्तुमसमर्थः।

अपरा सखी वदति - हे सखि! परन्तु मे पतिस्तु तस्मादपि अधिकः चतुरः अस्ति। तस्य स्वस्य लेखमपि स्वयं वाचयितुम् असमर्थः।

7. **टका धर्मः टका कर्म टका हि परमं तपः।**

**यस्य गेहे टका नास्ति हाटके टकटकायते॥ 7॥**

**अन्वयः** -टका धर्मः टका कर्म टका हि परमं तपः (अस्ति)। यस्य गेहे टका नास्ति (सः) हाटके टकटकायते।

**भावार्थः** - टका अर्थात् धनं, धनमेव धर्मः धनमेव कर्म परमं तपोऽपि धनम्। यस्य गेहे धनं नास्ति सः व्यापारक्षेत्रे आपणे केवलं ध्यानतया वस्तूनां निदर्शनमेव करोति। अयं श्लोकः धनस्य महत्त्वं प्रतिपादयति।

8. **घटं भिन्द्यात् पटं छिन्द्यात् कुर्याद् रासभरोहणम्।**

**येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत्॥ 8॥**

**अन्वयः** - घटं भिन्द्यात् पटं छिन्द्यात् रासभरोहणं कुर्यात्, येन केन प्रकारेण पुरुषः प्रसिद्धः भवेत्।

**भावार्थः** - मानवः प्रसिद्धिं प्राप्तुं यथा कथञ्चिद् अपि प्रयतेत यथा सः घटभेदनं कुर्यात् आवश्यकता चेत् रासभरोहणमपि कुर्यात् प्रसिद्ध्यै किमपि कर्तव्यं भवेत् तत्कर्तव्यम्।

9. **परान्नं प्राप्य दुर्बुद्धे मा प्राणेषु दयां कुरु।**

**दुर्लभानि परान्नानि प्राणा जन्मनि-जन्मनि॥ 9॥**

**अन्वयः** - हे दुर्बुद्धे! परान्नं प्राप्य प्राणेषु दयां मा कुरु। परान्नानि दुर्लभानि (सन्ति) प्राणाः जन्मनि जन्मनि (सन्ति)।

**भावार्थः** - श्लोकेऽस्मिन् कश्चित् घस्मरः कञ्चन प्रति कथयति - हे मूर्ख! यदि परकीयम् अन्नं मिलति तदा नाभितः कण्ठपर्यन्तं भोक्तव्यम्। यदि बहुभक्षणेन प्राणानां विनाशो भवति चेत् भवतु। चिन्ता न कर्तव्या। यतो हि परान्नानि दुर्लभानि सन्ति। प्राणास्तु प्रतिजन्म मेलिष्यन्ति एव।

10. **कमले कमला शेते हरः शेते हिमालये।**

**क्षीराब्धौ च हरिश्शेते मन्ये मत्कुणशङ्कया॥ 10॥**

**अन्वयः** - कमला कमले शेते, हरः हिमालये शेते, हरिः क्षीराब्धौ शेते, मत्कुणशङ्कया मन्ये।

**भावार्थः** - श्लोकेऽस्मिन् कविः हास्यरसं समुत्पादयन् कथयति इदानीं मत्कुणानां त्रासः समुपवर्धितः अस्ति। अत एव लक्ष्मीः कमले शयनं करोति। शिवः हिमालये शेते। हरिः क्षीरसागरे शयनं करोति। अहं मन्ये तावत् एते सर्वे खट्वां परित्यज्य भीताः यत्र तत्र शयनं कुर्वन्ति इति भावः।

## शब्दार्थाः

| | | |
|---|---|---|
| **युगपत्** = सहसा | **धात्रा** = ब्रह्मणा | **विषम्** = गरलम् |
| **टका** = धनम् | **आपणे** = विक्रयस्थाने | **रासभः** = गर्दभः |
| **प्रसिद्धः** = ख्यातः | **घस्मरः** = औदरिकः | **कमले** = पद्मे |
| **त्रासः** = भयम् | **मत्कुणानाम्** = रक्तपांयिनाम् | |

## स्वाध्यायः

1. **कोष्ठकप्रदत्तविकल्पेभ्यः योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) त्वम् एकं ......... याच। (वरम्, पुत्रम्, धनम्)

(2) भुजगेश्वरस्य ......... नाकारि। (नेत्रौ, कर्णौ, हस्तौ)

(3) ......... दद्यात् ......... दद्यात्। (हा हा-हु हू, हि ही - हो हो, हा हा - हे हे)

(4) चर्माम्बरं वीक्ष्य ......... ददौ। (अमृतम्, स्वकन्याम्, विषम्)

(5) कृपणेन समः ......... न भूतः न भविष्यति। (याचकः, दाता, चतुरः)

(6) श्रुणु सखी ......... मे भर्ता। (चतुरः, विद्वत्तमः, विदूषकः)

(7) टका हि परमं .........। (ज्ञानम्, तपः, ध्यानम्)

(8) येन केन प्रकारेण ......... पुरुषो भवेत्। (ज्ञाता, धनिकः, प्रसिद्धः)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) अन्धं, दरिद्रं, प्रियया विहीनं जनं वीक्ष्य ईश्वरः किं वदति?

(2) कदा परिवेषणं न कर्तव्यम्?

(3) समुद्रः पीताम्बरं विष्णुं दृष्ट्वा, तस्मै किं दत्तवान्?

(4) कृपणः आजीवनं किं करोति?

(5) कानि दुर्लभानि सन्ति?

**3. द्वित्रिवाक्यैः उत्तरं लिखत।**

(1) भाग्यविधाता शेषनागाय कर्णौ किमर्थं न दत्तवान्?

(2) यस्य गेहे धनं नास्ति सः किं करोति?

(3) कश्चित् घस्मरः कञ्चन प्रति किं कथयति?

**4. सविस्तरम् उत्तरं लिखत।**

(1) ''वासः प्रधानं खलु योग्यतायाः'' इत्यस्य तात्पर्यं लिखत।

(2) अन्धदरिद्रस्य जनस्य चातुर्यं वर्णयत।

(3) प्रसिद्धिं प्राप्तुं किं किं कर्तव्यम्?

**5. प्रदत्तसूचनानुसारं कुरुत।**

**(क) अ विभागं ब विभागेन सह योजयत।**

| अ | | ब |
|---|---|---|
| (1) वीक्ष्येश्वरो वदति | - | खलु योग्यतायाः |
| (2) नाकारि कर्णौ | - | न भूतो न भविष्यति |
| (3) न दद्यात् | - | हाटके टकटकायते |
| (4) वासः प्रधानं | - | याच वरं त्वमेकम् |
| (5) कृपणेन समो दाता | - | भुजगेश्वरस्य |
| (6) यस्य गेहे टका नास्ति | - | सिंहगर्जनैः |

**(ख) विभक्तिपरिचयो देयः।**

| | | |
|---|---|---|
| (1) नेत्रे | (2) वाससा | (3) धात्रा |
| (4) शिरांसि | (5) स्वकन्यायाः | (6) सख्यौ |

**छात्रप्रवृत्तिः**

छात्राः कक्षायाम् अन्यासां हास्यकणिकानां प्रस्तुतिं कुर्युः।

**अध्यापकप्रवृत्तिः**

अध्यापकाः सुभाषितरत्नभाण्डागारादिषु ग्रन्थेषु हास्ययुक्तान् श्लोकान् पठितुं छात्रान् प्रेरयेयुः।

●

# १

# सूक्तयः

**प्रस्तावना**

शोभना उक्ति इति सूक्तिः, यया उक्त्या जीवने बोधः वा सन्मार्गः प्राप्यते सा सूक्तिः।

सूक्तयः सांस्कृतिकसाहित्ये सदैव महत्त्वपूर्णस्थानं भजन्ते। सूक्तयः प्रायः सुभाषितेभ्य एव संकलिताः भवन्ति। सुभाषितेषु पूर्णश्लोकाः भवन्ति, सूक्तिषु सुभाषितानां पदैकेन बोधः प्राप्यते। सूक्तयः पुराणेभ्यः वेदेभ्यः स्मृतिभ्यः, काव्यादिभ्यश्च गृह्यन्ते। सूक्तिसुभाषितयोः भावार्थः प्रायः समान एव तथापि बोधसारल्यत्वेन सूक्तयः अग्रगामिन्यः सन्ति।

अस्मिन् पाठे प्रदत्ताः सूक्तयः। वशिष्ठस्मृतिनीतिशतककुमारसंभवहितोपदेशादिविविधग्रन्थेभ्यः चित्वा संस्थापिताः सन्ति। एताः सूक्तयः छात्राणां जीवने सदैव मार्गदर्शिकाः भविष्यन्ति इति।

1. **आचारहीनं न पुनन्ति वेदाः। - वशिष्ठस्मृतिः। 6। 3**

   **भावार्थः** - आचारहीनं जनं वेदाः अपि पवित्रं कर्तुम् असमर्थाः, तेन स्वकीयाचरणे पवित्रता भवतु, केवलं पठन-पाठने वा विधौ एव माऽस्तु।

2. **सत्सङ्गतिः कथय किं न करोति पुंसाम्। - नीतिशतकम्-18**

   **भावार्थः** - सतां संगतिः इति सत्सङ्गतिः, तेन सत्सङ्गतिः पुंसां किं कल्याणं न करोति? अर्थात् सा सत्सङ्गतिः मानवानां सर्वविधं कल्याणं करोति।

3. **विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः। - कुमारं : 1।59**

   **भावार्थः** - येषां चेतांसि विकारभूतेषु कार्येषु सत्स्वपि विकारयुतानि न भवन्ति, ते एव धीराः कथ्यन्ते।

4. **उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः। - हितोपदेशः**

   **भावार्थः** - कार्याणि उद्यमेन हि सिध्यन्ति, केवलं मनोरथैः न सिध्यन्ति। प्रयत्नः करणीयः, केवलं मनसा एव न चिन्तनीयम्।

5. **रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय। - मेघदूतम्**

   **भावार्थः** - अस्यां सूक्तौ कालिदासः कथयति यत् रिक्तपात्रम् अस्ति तत् लघुत्वमाप्नोति अर्थात् तस्य समाजे मूल्यं न भवति, किन्तु यानि पात्राणि पूर्णानि नानि एव बहुमूल्यानि सन्ति।

6. **हितं मनोहारि च दुर्लभं वचः। - किरातार्जुनीयम्, सर्ग : 1**

   **भावार्थः** - हितकारीणि मनोहारीणि च वचनानि खलु दुर्लभानि भवन्ति।

7. **वरं विरोधोऽपि समं महात्मभिः। - किरात्, सर्ग : 1**

   **भावार्थः** - महात्मभिः समं विरोधः अपि लाभप्रदः भवति।

8. **उत्सवप्रियाः खलु मनुष्याः। - अभिज्ञान, 6 अङ्केः**

   **भावार्थः** - मानवेभ्यः उत्सवाः सदैव रोचन्ते।

**9. सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः। - अभिज्ञान, : 1, 20**

**भावार्थः** - सन्देहपदेषु वस्तुषु सताम् अन्तःकरणप्रवृत्तयः (मनोव्यापारः) हि प्रमाणम्।

**10. न केवलं यो महतोऽपभाषते श्रुणोति तस्मादपि यः स पापभाक्। - कुमार : 5। 83**

**भावार्थः** - यः महापुरुषाणां निन्दां कुरुते, स एव केवलं पापभाक् न, अपि तु यः तेषां परिवादं श्रुणोति सोऽपि पापभाक् भवति।

**11. आज्ञा गुरूणां ह्यविचारणीया। - रघुवंशम् : 14। 46**

**भावार्थः** - गुरोः आज्ञायाः तत्क्षणमेव पालनं कर्तव्यम्। गुरुभिः विचार्य एव आज्ञा प्रदत्ता स्यात् इति मन्तव्यम्।

**12. न धर्मवृद्धेषु वयः समीक्ष्यते। - कुमार : 5। 16**

**भावार्थः** - धर्मवृद्धेषु प्रायः ज्ञानस्य समीक्षा कर्तव्या भवति, न खलु वयसः।

**13. विषवृक्षोऽपि संवर्ध्यं स्वयं छेत्तुमसांप्रतम्। - कुमार : 2। 55**

**भावार्थः** - स्वयं विषवृक्षसंवर्धनं कृत्वा तमेव छेत्तुं वा तत् सोढुमपि असह्यं भवति। तस्मात् विचिन्त्य कार्यं करणीयम्।

**14. मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः। - वैराग्यशतकम् : 53**

**भावार्थः** - मनसि सन्तोषः भवति चेत् सर्वजनाः समानाः एव दृश्यन्ते पश्चात् कोऽपि धनिकः वा दरिद्र इति भेदः न दृश्यते।

**15. सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति। - उत्तररामः**

**भावार्थः** - सूक्तयाऽनया ज्ञायते यत् सतां सज्जनैः सह संगः पुण्येन एव भवति।

**16. न हि ज्ञानेन सदृशं पवित्रमिह विद्यते। - गीताः**

**भावार्थः** - ज्ञानेन सदृशं पवित्रं खलु जगति अन्यत् किमपि नास्ति। ज्ञानेनैव धर्मार्थकाममोक्षप्राप्तिः सहजा सुलभा भवति।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| **पुंसाम्** | = पुरूषाणाम् | **चेतांसि** | = मनांसि | **मनोरथैः** | = स्वप्नैः |
| **हितम्** | = पथ्यम् | **वचः** | = वचनानि | **पापभाक्** | = पापभागी |

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) सूक्त्या जीवने ......... प्राप्यते? (सारल्यं, बोधः, चिन्ता)

(2) आचारहीनं जनं पवित्रं कर्तुं ......... असमर्थाः? (वेदाः, जनाः देवाः)

(3) सत्संगतिः ......... सर्वविधं कल्याणं करोति? (देवानाम्, मानवानाम्, राज्ञाम्)

(4) कार्याणि केन सिध्यन्ते? (चिन्तनेन, पठनेन, उद्यमेन)

(5) पूर्णता ......... वर्तते। (सेवकाय, उत्सवाय, गौरवाय)

(6) ......... वचनानि खलु दुर्लभानि भवन्ति? (विनाशकारी, प्रलयकारी, हितकारी)

(7) महात्मभिः समं ......... लाभदायी भवति। (पठनम्, वासः, विरोधः)

(8) ......... सदृशं पवित्रं जगति अन्यत् नास्ति? (धनेन, मानेन, ज्ञानेन)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) आचारहीनं जनं पवित्रं कर्तुं के असमर्थाः?

(2) केन धर्मार्थकाममोक्षप्राप्तिः सहजा सुलभा भवति?

(3) महात्मभिः समं विरोधः अपि कीदृशो भवति।

(4) सन्देहपदेषु वस्तुषु केषां अन्तःकरणप्रवृत्तयः प्रमाणम्?

(5) कीदृशानि वचनानि खलु दुर्लभानि भवन्ति?

**3. सविस्तरम् उत्तरं लिखत।**

(1) सत्संगतेः महत्त्वं किम्?

(2) गुरोराज्ञायाः महत्त्वम् किम्?

(3) सन्देहपदेषु वस्तुषु सतां अन्तःकरणप्रवृत्तयः किमर्थं प्रमाणम्?

(4) धनिकः वा दरिद्रः इति भेदः कदा न भवति?

**4. विभक्तिपरिचयो देयः।**

प्रवृत्तयः, मनसि, महात्मभिः, वचः, पुंसाम्।

**5. धातुपरिचयो देयः।**

पुनन्ति, कथय, समीक्ष्यते, सिध्यन्ते।

**6. समासानां परिचयो ददतु।**

सत्संगतिः, उत्सवप्रियाः, विषवृक्षः, धर्मवृद्धेषु।

**छात्रप्रवृत्तिः**

अन्यसूक्तीः चित्वा छात्राः सूक्तिमाधुर्यम् अनुभवन्तु।

**अध्यापकप्रवृत्तिः**

सुभाषितसूक्तयोः भेदं छात्रान् ज्ञापयतु।

●

# १०

# गुरोरनुशासनम्

**प्रस्तावना**

संस्कृतवाङ्मयं मनीषिभिः द्विधा विभाजितं वर्तते वैदिकं लौकिकं चेति। तत्र वैदिके चत्वारो वेदाः, ब्राह्मणग्रन्थाः, आरण्यकग्रन्थाः उपनिषदश्च समाविशन्ति। वैदिकसाहित्ये अन्तिमत्वात् उपनिषद् वेदान्तनाम्ना अपि प्रसिद्धा विद्यते। अष्टोत्तरशताधिकाः उपनिषदः सन्ति, परं कालहतासु तासु साम्प्रतम् ईशकेनकठादयः दश प्रमुखाः सन्ति। 'उप', 'नि' इत्युपसर्गपूर्वकः, गतिविशरणावसादनार्थकस्य 'षद्लृ' धातोः निष्पन्नः 'क्विप्' प्रत्यायन्तश्च एषः 'उपनिषद्त्' शब्दः। ब्रह्मविद्या एवास्याः प्रतिपाद्यो वेद्यश्च विषयः। एतासूपनिषत्सु विविधाः मनोहराः चोपदेशाः संवादरूपेण शोभन्ते।



प्रस्तुतोऽयं पाठः तैत्तरीयोपनिषदः संकलितो वर्तते। कृष्णयजुर्वेदस्य तैत्तरीयारण्यकस्य सप्तमः, अष्टमः नवमश्च प्रपाठकः 'तैत्तरीयोपनिषत्' कथ्यते। अस्यामुपनिषदि शिक्षावल्ली, ब्रह्मानंदवल्ली भृगुवल्ली चेति तिस्रो वल्ल्यः सन्ति। तत्र च शिक्षावल्ल्यां संहितादिविषयकाणां निरूपणं वर्तते। अस्याश्च एकादशेऽनुवाके गुरुः स्वान्तेवासिनं शिष्यं यदुपशिति तदेवात्र गुरोरनुशासनमित्यभिधानेन प्रस्तूयते। छात्राः वेदोपनिषद्रहस्यमिदं ज्ञात्वा सदाचरणानुरक्ताः भवेयुः।

1. **वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्यार्थं न प्रमदितव्यम्।**

   **भावार्थः** - आचार्यः वेदानाम् अध्यापनं कृत्वा आश्रमनिवासिनः ब्रह्मचारिणः शिष्यस्य अनुशासनं कुर्वन् उपदिशति यत् त्वं सदा सत्यं वद। अर्थात् यत् प्रमाणैः परिज्ञातं तत्तथैव वद। धर्मस्य आचरणं कुरु। अनुष्ठानादीनि कर्तव्यकर्माणि समाचरेति। स्वाध्याये प्रमादं मा कुरु। विद्यादानस्य ऋणमुक्तये आचार्यस्य कृते मनोवाञ्छितं

प्रियमभीष्टं च धनम् आनीय तस्य गुरोराज्ञां प्राप्य तत्पश्चादेव उद्वाहविधिना स्वानुरूपगुणयुतायाः स्त्रियः परिग्रहं कृत्वा संततिपरम्परां पालय अर्थात् तत्संततिक्रमस्य उच्छेदं मा कुरु। तात्पर्यमिदं यत् यदि पुत्रोत्पत्तिः न स्यात् चेत् पुत्रेष्ट्यादिविधानकर्मभिरपि तत्प्रजोत्पत्तये प्रयतितव्यमेवेति। सत्यात् कदापि प्रमादं मा कुर्याः। कदापि असत्यभाषणं न समाचरेदिति। कुशलात् मङ्गलमयशुभकर्मणः प्रमादं मा कुर्याः। ऐश्वर्यसाधनभूतात् माङ्गलिककार्यात् प्रमादं मा कुर्याः। वेदानां स्वाध्यायप्रवचनरूपाभ्यां पठन-पाठनकार्याभ्यां प्रमादं मा कुर्याः। देवकार्यार्थं पितृकार्यार्थं च कदापि प्रमादं मा कुर्याः।

2. **मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि। तानि त्वयोपास्यानि। नो इतराणि। ये के चास्मच्छ्रेयासो ब्राह्मणाः। तेषां त्वयाऽऽसनेन प्रश्वसितव्यम्। श्रद्धया देयम्। अश्रद्धयाऽदेयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्।**

**भावार्थः** - मातरि देवस्वरुपस्यावगन्ता भव। पितरि च देवत्वम् अनुभव। आचार्यं देवस्वरूपं जानीहि। अतिथिमपि देवस्वरूपमवगच्छ। यानि दोषरहितानि अनिंद्यानि च कार्याणि, तानि शिष्टाचाररूपाणि कर्माणि एव त्वया सेवनीयानि। शिष्टपुरुषैः महापुरूषैर्वा कृतान्यपि अन्यानि निन्द्यकर्माणि न आचरणीयानि। अस्माकम् आचार्याणां यानि शास्त्राविरुद्धानि सदाचरणानि सन्ति, अदृष्टफलावाप्तये तानि एव त्वया सेवितव्यानि। तद्विपरीतानि यदि आचार्यकृतानि अपि चेत् तानि कर्माणि कदापि न सेवनीयानि। ये केचन आचार्यत्वादिगुणैः अस्मत् श्रेष्ठतराः ब्राह्मणाः स्युः न तु क्षत्रियादयः, तेषां कृते त्वम् आसनादिकं दत्वा विश्रामं कारयेः। श्रद्धापूर्वकं दानं दातव्यम्। अश्रद्धया न दातव्यम्। आर्थिकस्थित्यनुसारं दातव्यम्। लज्जयापि दातव्यम्। भयेनापि दातव्यम्। यत्किमपि देयं तत्सर्वमपि सौहार्दभावनया विवेकपूर्वकं दातव्यम्।

3. **अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्। ये तत्र ब्राह्मणाः सम्मर्शिनः। युक्ता अयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु। ये तत्र ब्राह्मणाः सम्मर्शिनः। युक्ता अयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तेषु वर्तेरन्। तथा तेषु वर्तेथाः। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम् एवमुपासितव्यम्। एवम् चैतदुपास्यम्। (इति एकादशोऽनुवाकः।)**

**भावार्थः** - अथ यदि ते कर्तव्यस्य निर्वाहे निर्णये वा शंका स्यात्, सदाचरणविषये वा कदाचित् मनसि सन्देहः उद्भवेत्, तत्र ये उत्तमविचारवन्तः सद्गुणिनिश्च ब्राह्मणाः, कर्मकुशलाः योग्याः सदाचारलीनाः, मृदुस्वभावेन युक्ताः धर्माभिलाषिणश्च ब्रह्मणाः स्युः, ते यथा तत्तदवसरेषु आचरेयुः तथा एव तेषु अवसरेणु त्वमपि वर्तेथाः। अथ यदा दोषकलुषितैः जनैः सह व्यवहारेषु शंका स्यात् तदा तत्र ये उत्तमविचारवन्तः सद्गुणिनश्च ब्राह्मणाः, कर्मकुशलाः योग्याः सदाचारलीनाः, मृदुस्वभावयुताः धर्माभिलाणिनश्च ब्राह्मणाः स्युः, यथा तत्तदवसरेषु ते आचरेयुः तथा एव तेषु अवसरेषु त्वमपि वर्तेथाः। एषः शास्त्रादेशः। एष एव स्वशिष्येभ्यः पुत्रेभ्यश्च गुरोः उपदेशः। एतदेव वेदानां रहस्यम्। एतदेव परम्परानुरूपम् ईश्वरवचनोपेतं गुरोरनुशासनम् एवमेवैतत् उपासनीयम्। एवमेवैतत् आचरणीयम् इति भावः।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| **अनूच्य** | = अध्याप्य | **अन्तेवासिनम्** | = विद्यार्थिनम् | **प्रजातन्तुम्** | = सन्ततिपरम्परपराम् |
| **भूत्यै** | = ऐश्वर्याय | **आहृत्य** | = आनीय | **अनवद्यानि** | = निर्दोषाणि |
| **इतराणि** | = अन्यानि | **श्रेयांसः** | = श्रेष्ठाः | **श्रिया** | = धनेन |
| **ह्रिया** | = लज्जया | **भिया** | = भयेन | **संविदा** | = विवेकेन |
| **विचिकित्सा** | = सन्देहः | **अलूक्षाः** | = मृदुस्वभावाः | | |

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) वेदम् अनूच्य आचार्यः ......... अनुशास्ति। (शिष्यम्, स्वाध्यायम्, धर्मम्)

(2) ......... प्रमादं न कुर्यात्। (सत्यम्, स्वाध्यायेन, धर्मात्)

(3) ......... अन्तेवासिनम् उपदिशति। (आचार्यः, शिष्यः, कुशलः)

(4) गुरूणां ......... उपास्यं भवति। (दुश्चरितम्, सुचरितम्, विचारितम्)

(5) ब्राह्मणेभ्यः ......... न देयम्। (भिया, अश्रद्धया, संविदा)

(6) आचार्यदेवो ......... । (भव, भवत, भवः)

(7) ......... धर्मकामाः कथिताः। (शिष्याः, गुरवः, ब्राह्मणाः)

(8) वेदोपनिषत् अर्थात् .........। (वेदपरम्परा, वेदरहस्यम्, गुरूपदेशः)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) कस्य आचरणं कुर्यात्?

(2) काभ्यां न प्रमदितव्यम्?

(3) त्वया ब्राह्मणानां केन प्रश्वसितव्यम्?

(4) केभ्यः श्रद्धया देयम्?

(5) सम्मर्शिनः के सन्ति?

**3. द्वित्रिवाक्यैः उत्तरं लिखत।**

(1) कस्मै कीदृशं च धनम् आहरेत्?

(2) सेव्यासेव्यानि कर्माणि कानि?

(3) कीदृशान् ब्राह्मणान् अनुसरेत्?

**4. सविस्तरम् उत्तरं लिखत।**

(1) आचार्यः प्रमादविषये किं किम् उपदिशतीति सविस्तरं प्रतिपादयत।

(2) श्रेयसां ब्राह्मणानां दानविषये गुरुणा किं समुपदिष्टम्।

(3) कर्मविचिकित्सायां वृत्तविचिकित्सायां वा कथं व्यवहरेत्?

**5. प्रदत्तसूचनानुसारं कुरुत।**

**(क) अ विभागं ब विभागेन सह योजयत।**

| अ | | ब |
|---|---|---|
| (1) वेदमनूच्याचार्यः | - | तानि त्वयोपास्यानि |
| (2) श्रद्धया देयम् | - | तथा ते तत्र वर्तेथाः |
| (3) देवपितृकार्यार्थम् | - | एवमुपासितव्यम् |
| (4) यथा ते तत्र वर्तेरन् | - | अन्तेवासिनमनुशास्ति |
| (5) यान्यस्माकं सुचरितानि | - | अश्रद्धयाऽदेयम् |
| (6) एतदनुशासनम् | - | न प्रमदितव्यम्। |

**(ख) विभक्तिपरिचयो देयः।**

| | | |
|---|---|---|
| (1) भूत्यै | (2) प्रजातन्तुम् | (3) अस्माकम् |
| (4) संविदा | (5) सम्मर्शिनः | (6) तेषु |

**(ग) सन्धिविच्छेदं कुरुत।**

| | | |
|---|---|---|
| (1) कुशलान्न | (2) धनमाहृत्य | (3) त्वयाऽऽसनेन |
| (4) अतिथिदेवो भव | (5) वेदोपनिषत् | (6) चैतदुपास्यम् |

**(घ) सन्धिं कुरुत।**

| | | |
|---|---|---|
| (1) आचार्यः + अन्तेवासिनम् | (2) स्वाध्यायात् + मा | (3) त्वया + उपास्यानि |
| (4) यानि + अनवद्यानि | (5) एषः + उपदेशः | (6) एतत् + अनुशासनम् |

**(ङ) धातुपरिचयो देयः**

| | | |
|---|---|---|
| (1) अनुशास्ति | (2) वद | (3) वर्तेथाः |
| (4) स्यात् | (5) भव | (6) वर्तेरन् |

**छात्रप्रवृत्तिः**

प्रदत्तपाठमाधारीकृत्य गुरुशिष्यपरम्परायाः सचित्रं परियोजनाकार्यं निर्माय प्रस्तूयताम्।

**अध्यापकप्रवृत्तिः**

अध्यापकाः गुरुशिष्यसम्बन्धविषयिणीं कथां प्राप्य कक्षायां श्रावयेयुः।

●

(११)

# यमनचिकेतसोः संवादः

**प्रस्तावना**

**''ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरः।**
**ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश॥''**

यथा वयं जानीमः यत् 'उपनिषत्' इति ब्रह्मविद्या अप्युच्यते। तत्र अष्टोत्तरशतम् उपनिषदः सारभूताः सन्ति। तत्रापि महत्वपूर्णाः अतिप्रसिद्धाश्च दशैवोपलभ्यन्ते। यम-नचिकेता, याज्ञवल्क्य-मैत्रेयी, उद्दालक-आरुणि-श्वेतकेतु, इत्येषां संवादमाध्यमेन उपनिषदः गहनतमंसत्यमपि सारल्यतया प्रस्तुवन्ति। सम्पूर्णविश्वस्य तत्वचिन्तनेषु उपनिषदः सर्वश्रेष्ठाः सन्ति विश्वं च शान्तिमार्गं नयन्ति। 'एकेन विज्ञातेन सर्वमिदं विज्ञातं भवति।' इति उपनिषदां केन्द्रस्थः सिद्धान्तः।



प्रस्तुतोऽयं पाठः कठोपनिषदः प्रथमाध्यायस्य प्रथमवल्ल्यनुसारं निर्मितः। अस्यामुपनिषदि कृष्णयजुर्वेदस्य 'कठ' शाखायाः समावेशो भवति। यम-नचिकेतसोः संवादमाध्यमेन ब्रह्मविद्यायाः उपदेश एवास्याः उपनिषदः प्रमुखविषयो वर्तते। नचिकेता बालः सन्नपि महाज्ञानी अस्ति। सांसारिकजीवात्मनः प्रतीकस्वरूपः तस्य पिता यज्ञान्ते यदा वृद्धानां, क्षीणदुग्धानाम् अदुग्धानां च गवां दानेन पुण्यप्राप्तिकामः जायते तदा निर्मोहः सन् स्वपितुः चेष्टायामस्याम् अरुचित्वात् स्वपितरं पृच्छति यत् दानेषु प्रियं वस्तु दीयते, अहमपि ते प्रियः चेत् भवान् मां कस्मै दास्यति? इति। नैकवारं कृतेनानेन प्रश्नेन उद्विग्नमनाः वाजश्रवाः तं यमाय समर्पयितुं कथयति। ततः पितुराज्ञां पालयन् स तु यमलोकं प्राप्य यमस्यानुपस्थितौ क्षुत्पिपासाकुलः सन्नपि त्रिरात्रिपर्यन्तं तत्रैवावसत्। यमः समागत्य बालस्य नचिकेतसः दृढसङ्कल्पं पितृभक्तिं च विलोक्य प्रसन्नो भूत्वा वरत्रयमयच्छत्। स एवात्र प्रसङ्गो वर्णितः।

1. **तिस्रो रात्रीर्यदवात्सीर्गृहे मे अनश्नन्ब्रह्मन्नतिथिर्नमस्यः।**
**नमस्तेऽस्तु ब्रह्मन्स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन्वरान्वृणीष्व ॥ अ. 1, वल्ली 1, मं. 9॥**

**अन्वयः** - ब्रह्मन्। नमस्यः अतिथिः, ते नमः अस्तु। ब्रह्मन्। मे स्वस्ति अस्तु यत् तिस्रः रात्रीः मे गृहे अनश्नन् अवात्सीः। तस्मात् प्रति त्रीन् वरान् वृणीष्व।

**भावार्थः** - हे ब्रह्मन्। त्वं तु मे नमस्कारयोग्यः अतिथिः असि अतः तुभ्यं नमः। मम कल्याणमस्तु यतः रात्रित्रयं यावत् भोजनं विनैव मम गृहे न्यवसः। अतः प्रतिरात्रि वरत्रयं याचस्व।

2. **शान्तसङ्कल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो माभि मृत्यो।**
**त्वत्प्रसृष्टं माभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे॥ अ. 1, वल्ली 1, मं. 10॥**

**अन्वयः** - मृत्यो! यथा गौतमः मा अभि शान्तसङ्कल्पः, सुमनाः वीतमन्युः स्यात्। त्वत्प्रसृष्टं मा प्रतीतः अभिवदेत्। एतत् त्रयाणां प्रथमं वरं वृणे।

**भावार्थः** - हे मृत्युदेव! यथा गौतमकुलोद्भवः वाजश्रवापुत्रः उद्दालकः मां प्रति शांतसङ्कल्पः, प्रसन्नचित्तः क्रोधरहितः च स्यात्। त्वया प्रेषितं मां वीक्ष्य मयि विश्वसेत् वात्सल्यपूर्वकं च वार्तालापं कुर्यात् इति प्रथमवरमहं याचे।

3. **यथा पुरस्ताद्भविता प्रतीत औद्दालकिरारुणिर्मत्प्रसृष्टः।**
**सुखं रात्रीः शयिता वीतमन्युस्त्वां ददृशिवान्मृत्युमुखात्प्रमुक्तम्॥ अ. 1, वल्ली 1, मं. 11॥**

**अन्वयः** - त्वा मृत्युमुखात् प्रमुक्तम् ददृशिवान् मत्प्रसृष्टः आरुणिः औद्दालकिः यथा पुरस्तात् प्रतीतः वीतमन्युः भविता रात्रीः सुखं शयिता।

**भावार्थः** - यमः कथयति-त्वां मृत्युमुखात् प्रत्यावर्तमानं दृष्ट्वा मम प्रेरणया तव पिता अरुणपुत्रः उद्दालकः नितान्तं प्रसन्नः भविष्यति। स्वपुत्ररूपं त्वाम् अवगत्य पूर्ववत् एव वात्सल्यं दास्यति प्रसन्नचित्तः क्रोधरहितः च भूत्वा त्वां प्राप्य सः आजीवनं सुखपूर्वकं रात्रौ शयनं करिष्यतीति भावः।

4. **स्वर्गे लोके न भयं किञ्चनास्ति न तत्र त्वं न जरया बिभेति।**
**उभे तीर्त्वाशनायापिपासे शोकातिगो मोदते स्वर्गलोके॥ अ. 1, वल्ली 1, मं. 12॥**

**अन्वयः** - स्वर्गे लोके किञ्चन भयं न अस्ति। तत्र त्वं न, जरया न बिभेति। स्वर्गलोके अशनायापिपासे उभे तीर्त्वा शोकातिगः मोदते।

**भावार्थः** - नचिकेता अवदत्- हे मृत्युदेव! स्वर्गलोके किञ्चित् भयं न भवति। तत्र मृत्युरूपः त्वमपि न वर्तेथाः। कश्चन तत्र वृद्धावस्थाया अपि भयं नानुभवति। स्वर्गलोके बुभुक्षां तृषाम् इति उभे तीर्त्वा शोकातिगः आनन्दं प्राप्नोति।

5. **स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि त्वं श्रद्दधानाय मह्यम्।**
**स्वर्गलोका अमृतत्वं भजन्त एतद्द्वितीयेन वृणे वरेण॥ अ. 1, वल्ली 1, मं. 13॥**

**अन्वयः** - मृत्यो! सः त्वं स्वर्ग्यम् अग्निम् अध्येषि। त्वं मह्यं श्रद्धानाय प्रब्रूहि। स्वर्गलोकाः अमृतत्वं भजन्ते, एतत् द्वितीयेन वरेण वृणे।

**भावार्थः** - हे यमराज! त्वं तु स्वर्गसाधनरूपम् अग्निं जानासि एव। अतः श्रद्धालवे मह्यं त्वं तन्माहात्म्यं वर्णय यतः स्वर्गप्राप्ताः पुरुषाः अमृतत्वं लभन्ते। एतद् अहं द्वितीयेन वरेण वाञ्छामि।

6. **प्र ते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन्।**
**अनन्तलोकाप्तिमथो प्रतिष्ठां विद्धि त्वमेतं निहितं गुहायाम्॥ अ. 1, वल्ली 1, मं. 14॥**

**अन्वयः** - नचिकेतः! स्वर्ग्यम् अग्निं प्रजानन् ते प्रब्रवीमि। तत् उ मे निबोध। त्वम् एतम् अनन्तलोकाप्तिं प्रतिष्ठाम् अथो गुहायां निहितं विद्धि।

**भावार्थः** - यमराजः अवदत्- हे नचिकेतः! स्वर्गमवापम् अग्निं प्रजानन् अहं यथातथं ते कथयामि। तत् त्वं मत्तः सम्यक्तया अवगच्छ। स्वर्गलोकप्राप्तिसाधनः तदाधारस्वरूपः अग्निः विदुषां सन्मतिरूपगुहायां निवसतीति त्वं जानीहि।

7. **तमब्रवीत्प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः।**
**तवैव नाम्ना भवितायमग्निः सृङ्कां चेमामनेकरूपां गृहाण॥ अ. 1, वल्ली 1, मं. 16॥**

**अन्वयः** - प्रीयमाणः महात्मा तम् अब्रवीत् अद्य तव इह भूयः वरम् ददामि। अयम् अग्निः तव एव नाम्ना भविता च इमाम् अनेकरूपां सृङ्कां गृहाण।

**भावार्थः** - प्रसन्नः महात्मा यमः तं नचिकेतसम् अवदत्-अद्य अहं भूयः अधिकं वरं ददामि। अयम् अग्निः तवैव नाम्ना ख्यातः भविष्यति। इमाम् अनेकरूपां मालां स्वीकुरु।

8. **त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्मकृत्तरति जन्ममृत्यू।**
**ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति॥ अ. 1, वल्ली 1, मं. 17॥**

**अन्वयः** - त्रिणाचिकेतः त्रिभिः सन्धिम् एत्य त्रिकर्मकृत् जन्ममृत्यु तरति। ब्रह्मजज्ञं ईड्यं देवं विदित्वा निचाय्य इमाम् अत्यन्तम् शान्तिम् एति।

**भावार्थः** - वारत्रयं अस्याग्नेः अनुष्ठाता जनः मातापित्राचार्यैरिति त्रिभिः सन्धिं प्राप्य यज्ञदानतपोरूपाणि त्रीणि कर्माणि कुर्वन् जन्ममृत्यू तरति। ब्रह्मजज्ञं स्तुत्यम् अग्निदेवं ज्ञात्वा निष्कामभावेन चयनं च कृत्वा इमाम् अत्यन्तां शान्तिं प्राप्नोति।

9. **एष तेऽग्निर्नाचिकेतः स्वर्ग्यो यमवृणीथा द्वितीयेन वरेण।**
**एतमग्निं तवैव प्रवक्ष्यन्ति जनासस्तृतीयं वरं नचिकेतो वृणीष्व॥ अ. 1, वल्ली 1, मं. 19॥**

**अन्वयः** - नचिकेतः! एषः ते स्वर्ग्यः अग्निः यम् द्वितीयेन वरेण अवृणीथाः। एतम् अग्निं जनासः तव एव प्रवक्ष्यन्ति। तृतीयं वरं वृणीष्व।

**भावार्थः** - हे नचिकेतः! त्वया द्वितीयेन वरेण यस्य याञ्चा विहिता तत्स्वर्गप्राप्तिसाधनरूपम् अग्निविज्ञानं मया ते प्रदत्तम् जनाः अग्निमेनं तवैव नाम्ना सम्बोधयिष्यन्ति। हे नचिकेतः! अधुना तृतीयं वरं वृणीष्व।

10. **येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके।**
**एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः॥ अ. 1, वल्ली 1, मं. 20॥**

**अन्वयः** - प्रेते मनुष्ये या इयम् विचिकित्सा, एके अयम् अस्ति इति एके च न अस्ति इति। त्वया अनुशिष्टः अहम् एतद् विद्याम्। एषः वराणां तृतीयः वरः।

**भावार्थः** - नचिकेता अवदत- प्राणिनः मृत्योः पश्चात् केचन कथयन्ति 'आत्मा अस्ति' केचन च कथयन्ति 'आत्मा नास्ति' इत्यस्मिन् विषये यः सन्देहः जायते, तदहं त्वया बोधितः एतत् सम्यक् अवगच्छेयम्। एषः वराणां तृतीयः वरः चास्ति।

11. **देवैरत्रापि विचिकित्सितं पुरा न हि सुविज्ञेयमणुरेष धर्मः।**
**अन्यं वर नचिकेतो वृणीष्व मा मोपरोत्सीरति मा सृजैनम्॥ अ. 1, वल्ली 1, मं. 21॥**

**अन्वयः** - नचिकेतः! अत्र पुरा देवैः अपि विचिकित्सितम्। हि एषः धर्मः अणुः न सुविज्ञेयम्। अन्यं वरं वृणीष्व। मा मा उपरोत्सीः, एनम् मा अतिसृज।

**भावार्थः** - हे नचिकेतः! अस्मिन् विषये पुरा देवानामपि सन्देहः अभवत्। निश्चयेन एषः धर्मः सूक्ष्मः अस्ति सुगम्यः च नास्ति। अतः अन्यं वरं वृणीष्व। एतं वरं प्राप्तुं दुराग्रहं मा कुरु। एतं वरं मां प्रतियच्छ।

12. **देवैरत्रापि विचिकित्सितं किल त्वं च मृत्यो यन्न सुज्ञेयमात्थ।**
**वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यो वरस्तुल्य एतस्य कश्चित् ॥ अ. 1, वल्ली 1, मं. 22॥**

**अन्वयः** - मृत्यो! त्वं यत् आत्थ अत्र किल देवैः अपि विचिकित्सितं न च सुविज्ञेयं च अस्य वक्ता त्वादृक् अन्यः न लभ्यः। (अतः) एतस्य तुल्यः वरः अन्यः कश्चित् वरः न।

**भावार्थः** - हे यमराज! भवता यदेवम् उक्तं यत् पुरा देवैरपि अस्मिन् विषये विचारः कृतः किन्तु ते अस्मिन् विषये निर्णयं कर्तुं नापारयन् तथा च अयं विषयः सुगम्यः अपि नास्ति चेत् अत्र त्वादृक् अन्यः वक्ता अपि सुलभः नास्त्येव। अतः मन्मत्या एतस्मादपरः तुल्यः वरः अपि कश्चित् नास्ति।

13. **शतायुषः पुत्रपौत्रान्वृणीष्व बहून् पशून्हस्तिहिरण्यमश्वान्।**
**भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि॥ अ. 1, वल्ली 1, मं. 23॥**

**अन्वयः** - शतायुषः पुत्रपौत्रान् बहून् पशून् हस्तिहिरण्यम् अश्वान् वृणीष्व। भूमेः महत् आयतनं वृणीष्व स्वयं च यावत् शरदः इच्छसि, जीव।

**भावार्थः** - अथ यमराजः अवदत् हे नचिकेतः! शतायुषः पुत्रपौत्रादीन्, बहून् गवादिपशून्, गजं, सुवर्णम् अश्वान् वा वृणीष्व। विशालभूमण्डलसाम्राज्यमपि वृणीष्व। स्वयं च यावदिच्छसि तावत् जीवनं यापय।

14. **श्वोभावा मर्त्यस्य यदन्तके तत्सर्वेन्द्रियाणां जरयन्ति तेजः।**
**अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते ॥ अ.1, वल्ली 1, मं. 26॥**

**अन्वयः** - अन्तक! श्वोभावाः मर्त्यस्य सर्वेन्द्रियाणां यत् तेजः एतत् जरयन्ति। अपि सर्वं जीवितम् अल्पम् एव, तव वाहाः नृत्यगीते तव एव।

**भावार्थः** - निष्कामः नचिकेता उवाच यत् हे प्रजान्तक! भवता ये वर्णिताः अनित्याः भोगाः सन्ति ते मानवस्य सर्वेन्द्रियाणां यत् तेजः भवति तत्तेजो नाशयन्ति। एतत् सर्वमपि जीवनं स्वल्पमेवास्ति। अतः भवतः रथादीनि वाहनानि, अप्सरसां नृत्यगीते चापि भवत्समीपे एव तिष्ठन्तु। अहं नेच्छामीति भावः।

15. **न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा।**
**जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव॥ अ. 1, वल्ली 1, मं.27॥**

**अन्वयः** - मनुष्यः वित्तेन तर्पणीयः न चेत् त्वा अद्राक्ष्म, वित्तं लप्स्यामहे, त्वं यावत् ईशिष्यसि जीविष्यामः। मे वरणीयः वरः तु सः एव।

**भावार्थः** - मनुष्यः कदापि धनेन तृप्तिं नैव प्रयाति। यदा भवतां दर्शनं सञ्जातम् अस्ति चेत् धनं तु वयम् अवश्यं प्राप्स्यामः एव। तथा च यावत् त्वम् इच्छसि तावत् तु वयं जीविष्यामः एव। अतः मे वरणीयः वरः तु सः एव वर्तते।

16. **यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्साम्पराये महति ब्रूहि नस्तत्।**
**योऽयं वरो गूढमनुप्रविष्टो नान्यं तस्मान्नचिकेता वृणीते ॥ अ. 1, वल्ली. 1, मं. 29॥**

**अन्वयः** - मृत्यो! यस्मिन् महति साम्पराये इदं विचिकित्सन्ति (तत्र) यत् तत् नः ब्रूहि। यः अयं गृढम् अनुप्रविष्टः वरः, तस्मात् अन्यं नचिकेता न वृणीते।

**भावार्थः** - नचिकेताः कथयति यत् - हे यमराज! यस्मिन् आत्मसम्बन्धिनि महति ज्ञानविषये जनाः एवं शंकां कुर्वन्ति यत् मृत्योः अनन्तरम् आत्मनः अस्तित्वं भवति न वा तद्विषये भवतः निर्णायकम् अनुभूतं च ज्ञानं स्यात् कृपया तत् नः उपदिश। आत्मसम्बन्धी वरः अयं नितान्तं गहनः इति सत्यं, किन्तु तथापि भवतः शिष्यः नचिकेताः तस्मात् भिन्नं कमप्यन्यं वरं प्राप्तुं नेच्छति।

### शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| **नमस्यः** | = नमस्कारयोग्यः | **अनश्नन्** | = भोजनं विना | **वीतमन्युः** | = क्रोधरहितः |
| **सुमनाः** | = प्रसन्नचित्तः | **ददृशिवान्** | = दृष्ट्वा | **मत्प्रसृष्टः** | = मया प्रेरितः |
| **जरया** | = वृद्धावस्थया | **अध्येषि** | = जानासि | **विद्धि** | = जानीहि |
| **सृक्काम्** | = मालाम् | **ईड्यम्** | = स्तुतियोग्यम् | **निचाय्य** | = चयनं कृत्वा |
| **अणुः** | = सूक्ष्मः | **प्रीयमाणः** | = प्रसन्नः | **जनासः** | = मनुष्याः |
| **विचिकित्सा** | = संशयः | **वित्तेन** | = धनेन | | |

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) नचिकेताः ......... रात्रीः अवात्सीत्। (त्रयः, तिस्रः, त्रीणि)

(2) सः प्रथमवरेण ......... प्रसन्नताम् अयाचत। (स्वसुः, मातुः, पितुः)

(3) स्वर्गे लोके किञ्चन......... नास्ति। (भयम्, धनम्, सुवर्णम्)

(4) स्वर्गलोकाः ......... भजन्ते। (सुखम्, सुचरितम्, अमृतत्वम्)

(5) नचिकेतः त्वं ......... अग्निं निबोध। (स्वर्ग्यम्, पूज्यम्, ज्ञेयम्)

(6) ......... महत् आयतनं वृणीष्व। (भूमेः, भवतः, जनानाम्)

(7) श्वोभावाः मर्त्यस्य सर्वेन्द्रियाणां ......... जरयन्ति। (सुखम्, ग्लानिः, तेजः)

(8) नचिकेताः तृतीयेन वरेण ......... वृणीते। (वेदज्ञानम्, आत्मज्ञानम्, स्वर्ग्यम्)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) कतमेन वरेण पितुः प्रसन्नता याचिता?

(2) वीतमन्युः कः भवेत्?

(3) कुत्र भयं जरा वा न भवति?

(4) यमः अनेकरूपां सृङ्कां कस्मै ददाति?

(5) आत्मज्ञानविषये कैः पुरा विचिकित्सितम्?

**3. द्वित्रिवाक्यैः उत्तरं लिखत।**

(1) नचिकेताः प्रथमवरेण किम् अयाचत?

(2) नाचिकेताग्निचयनस्य किं फलम्?

(3) नचिकेता किं कथयित्वा प्रलोभनं न स्वीकारोति?

**4. सविस्तरम् उत्तरं लिखत।**

(1) स्वर्गस्वरूपवर्णनं पाठानुगुणं लिखत।

(2) यमराजेन किं प्रलोभनं प्रदत्तम् तत्र च नचिकेतसः का प्रतिक्रिया आसीत्?

(3) यमनचिकेतसोः संवादं यथामति प्रतिपादयत।

**5. प्रदत्तसूचनानुसारं कुरुत।**

**(क) अ विभागं ब विभागेन सह योजयत।**

| अ | | ब |
|---|---|---|
| (1) न वित्तेन तर्पणीयो मनुष्यो | - | लक्ष्यम् |
| (2) योऽयं वरो गूढमनुप्रविष्टो | - | मा मोपरोत्सीरति मा सृजैनम्। |
| (3) अन्यं वरं नचिकेतो वृणीष्व | - | एतद्द्वितीयेन वृणे वरेण। |
| (4) त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं | - | लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा। |
| (5) स्वर्गलोका अमृतत्वं भजन्त | - | नान्यं तस्मान्नचिकेता वृणीते। |

**( ख ) सन्धिं कुरुत।**

| | | |
|---|---|---|
| (1) यः + अयम् | (2) अतिथिः + नमस्यः | (3) तव + एव |
| (4) महत् + आयतनम् | (5) या + इयम् | (6) अस्ति + इति |

**( ग ) धातुपरिचयो देयः।**

| | | |
|---|---|---|
| (1) बिभेति | (2) उवाच | (3) वृणीष्व |
| (4) जीविष्यामः | (5) रमेत | (6) प्रवक्ष्यन्ति |

**( घ ) समासपरिचयो देयः**

| | | |
|---|---|---|
| (1) जन्म-मृत्यू | (2) वीतमन्युः | (3) महात्मा |
| (4) पुत्रपौत्रान् | (5) अनश्नन् | (6) नृत्यगीते |

**छात्रप्रवृत्तिः**

छात्राः उपनिषदां परिचयं प्राप्नुयुः।

पाठस्य सूक्तीनां कण्ठस्थीकरणं कृत्वा प्रार्थना सभायां प्रस्तुवन्तु।

**अध्यापकप्रवृत्तिः**

अध्यापकाः अन्यासाम् उपनिषदाम् संवादान् प्राप्य कक्षायां श्रावयेयुः।

●

# १२

# कस्येयं भार्या भवितुमर्हति

**प्रस्तावना**

एकः वार्तासंग्रहः ''वेतालपञ्चविंशतिः'' इति नाम्ना विख्यातः। अस्मिन् ग्रन्थे पञ्चविंशतिवार्ताः सन्ति। अस्मिन् संग्रहे राजा विक्रमादित्यः भिक्षोः साहाय्यार्थं वृक्षस्योपरि विहितवासंमानवदेहं नेतुं गच्छति। यदा तं देहं स्वस्कन्धे आरोपयति तदा देहे स्थितो वेतालः राजानम् एकां वार्तां कथयति। कथायाः अन्ते समस्यायाः समाधानार्थं वेतालः राजानं प्रश्नान् पृच्छति। राजा प्रश्नं श्रुत्वा प्रश्नस्योत्तरार्थं मौनभङ्गं करोति। एवं पुनः पुनर्जाते सति कथासु विशेषानन्दरसस्योद्भवो भवति। जिज्ञासावर्धनात् एवं बुद्धेः परीक्षायाः कारणात् ग्रन्थोऽयम् अति प्रसिद्धोऽपि वर्तते।

प्रस्तुतः पाठः वेतालपञ्चविंशतिनामकात् ग्रन्थादुद्धृतोऽस्ति।



अथ सः नृपः त्रिविक्रमसेनः शिंशपापादपान्तिकं वेतालं पुनरानेतुमगात्। मृतदेहस्थवेतालं स्कन्धमारोप्य तूष्णीम् अगच्छत्। सः वेतालः नृपस्य विनोदाय कथाम् अब्रवीत्।

अस्त्येकः कालिन्दीरोधे ब्रह्मस्थलाभिधः संवसथः। अग्निस्वामी नाम कश्चिद्वेदज्ञो ब्राह्मणः तस्मिन् ग्रामे निवसति स्म। विप्रस्य गेहे सुरूपा मन्दारवतीनाम्नी कन्यका आसीत्। यदा तस्याः यौवनावस्था जाता, तदा तत्र विवाहार्थं कान्यकुब्जतः समसर्वगुणाः त्रयः द्विजपुत्राः आययुः। समसर्वगुणत्वात् अग्निस्वामी तेभ्यः एकस्य वरणे अशक्तः। रूपमुग्धाः त्रयः कुमाराः तत्रैवावसन्। कालान्तरे कुमारी मन्दारवती दाहज्वरवशेन पञ्चत्वञ्जगाम। ततस्ते विप्रकुमाराः तां कन्यामग्निसाच्चक्रुः। ततः तेषु प्रथमः तत्रैव श्मशाने मठं निर्माय भस्मशय्यायाः समीपे एव अवसत। द्वितीयस्तु अस्थीनि नीत्वा गङ्गादितीर्थं गतः। तृतीयः कुमारः देशान्तराणि भ्राम्यन् दिनानि अयापयत्। देशान्तराणि भ्राम्यन् सः विप्रकुमारः वक्रोलकनामनि ग्रामे आयाति। तत्र सः कस्यचिद् ब्राह्मणस्य गेहे अतिथिर्भवति। गृहे यः विप्रः, सः सञ्जीवनीविद्यायाः वेत्ता आसीत्। सः सञ्जीवनीविद्यां सेवाप्रसादरूपेण विप्रकुमाराय अददात्।

विद्यां ज्ञात्वा विप्रकुमारः, श्मशाने मठं निर्माय मन्दारवत्याः भस्मशय्यायाः समीपे स्थितस्य ब्राह्मणकुमारस्य समीपे गच्छति। तदा गङ्गादितीर्थं गतः द्वितीयः कुमारः अपि तत्र आयाति। इत्थं सर्वेऽपि कुमाराः सम्मिलिताः भवन्ति। तेषां मध्ये परस्परं वार्तालापः भवति। तदानीं तृतीयः कुमारः कथयति मम समीपे सञ्जीवनीविद्या अस्ति, अतः अहं कुमारीं मन्दारवतीं पुनर्जीवयितुं शक्नोमि। किन्तु तस्य कृते मन्दारवत्याः भस्मचयं सुरक्षितं कृत्वा अत्रैव श्मशाने मठं निर्माय निवसामि। मम समीपे तस्याः भस्मचयः अस्ति। तदा तृतीय कुमारः भस्मचयस्य उपरि सञ्जीवनीविद्यायाः प्रयोगं कृतवान्। तत्क्षणमेव विद्यासाहाय्येन सा मन्दारवती उदतिष्ठत्। तां दृष्ट्वा त्रयोऽपि कुमाराः परस्परं विवादमारभन्त। तृतीयोऽकथयत् इयं मम विद्याप्रभावात् जीविता, अतः सा ममैव भार्या भवितुमर्हति। द्वितीयः उक्तवान् मम गङ्गादितीर्थभ्रमणपुण्यैः

पुनर्जीविता, अतः इयं ममैव भार्या भवितुमर्हति। प्रथमोऽवदत् भस्मरक्षा तु मया कृता तर्हि भार्या तु ममैव भवितुमर्हति नान्यस्य इति।

एवं कथायाः समाप्तिं कृत्वा वेतालः नृपमपृच्छत् हे नृप! त्वमेव वद "कस्येयं भार्या भवितुमर्हति ?"

नृपोऽवदत् यस्य कुमारस्य विद्यया कन्या जीविता जाता सः तस्याः तातः। येन च तस्याः अस्थीनि गङ्गादितीर्थे नीतानि, सः कुमारः तस्याः सुतः। परं च अकथयत् -

**"यस्तु तद्भस्मशय्यां तामाश्लिष्यासीत्तपश्चरन्।**
**श्मशान एव तत्प्रीत्या भर्ता तस्याः स उच्यते॥"**

एवं श्रुत्वा वेतालः नृपस्य मौनभङ्गकारणात् नृपस्कन्धात् उड्डीय पुनः स्वतरुम् अगच्छत्।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| **कालिन्दीरोधे** | = | कालिन्द्याः तटे | **संवसथः** | = | ग्रामः |
| **पञ्चत्वम्** | = | मरणम् | **अग्निसात्** | = | अग्निमयम् |
| **तापसः** | = | तपस्वी | **जाह्नवी** | = | गङ्गा |
| **आश्लेषः** | = | आलिङ्गनम् | **अर्हति** | = | योग्यः भवति |

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) वेतालपञ्चविंशतिग्रन्थे .......... वार्ताः सन्ति। (पञ्चविंशतिः, एकविंशतिः, चतुर्विंशतिः)
(2) त्रिविक्रमसेनः शिंशपापादपान्तिकं .......... आनेतुमगात्। (मन्दारवतीम्, वेतालम्, कुमारम्)
(3) वेतालः नृपस्य विनोदाय .......... अब्रवीत्। (सुभाषितम्, मंत्रम्, कथाम्)
(4) कालिन्दीतटे .......... संवसथः। (ब्रह्मस्थलाभिधः, देवस्थलाभिधः, उग्रस्थलाभिधः)
(5) .......... नाम ब्राह्मणः ग्रामे निवसति स्म। (ब्रह्मदत्तः, चन्द्रः, सूर्यः)
(6) विप्रस्य गेहे .......... नाम्नी कन्यका आसीत्। (मन्दारवती, सत्यवती, लीलावती)
(7) विवाहार्थं कान्यकुब्जतः समसर्वगुणाः त्रयः .......... आययुः। (वणिक्पुत्राः, राजपुत्राः, द्विजपुत्राः)
(8) कालान्तरे कुमारी मन्दारवती .......... पञ्चत्वञ्जगाम। (दाहज्वरवशेन, पाण्डुरोगेण, सर्पदंशेन)

**2. एकैकवाक्येन प्रश्नानाम् उत्तरं लिखत।**

(1) समसर्वगुणत्वात् तेभ्यः एकस्य वरणे कः अशक्तः?
(2) एकः कुमारः मठं निर्माय कस्याः समीपे एव वसति?
(3) द्वितीयः कुमारः अस्थीनि नीत्वा कुत्र गतः?
(4) तृतीयः कुत्र भ्राम्यन् दिनानि अयापयत्?
(5) सञ्जीवनीविद्यायाः वेत्ता कः आसीत्?

**3. द्वित्रिवाक्यैः उत्तरं लिखत।**

(1) त्रिविक्रमसेनः वैतालम् आनेतुं किमर्थम् अगच्छत्?
(2) ब्राह्मणकुमाराणां मध्ये विवादस्य कारणं किम् आसीत्?
(3) त्रयाणां ब्राह्मणानां मध्ये कः विवादः जातः?

**4. सविस्तरमुत्तरं लिखत।**

(1) मन्दारवत्याः अग्निसंस्कारानन्तरं कुमारैः किं कृतम्?

(2) ब्राह्मणकुमाराणां मध्ये विवादस्य कारणं किम् आसीत्?

(3) नृपः किमुत्तरम् अयच्छत्?

**5. प्रदत्तसूचनानुसारं कुरुत।**

**(क) अ - विभागं ब - विभागेन सह योजयत।**

| अ | | ब |
|---|---|---|
| (1) प्रथमः | - | कुमारः देशान्तराणि भ्राम्यन् दिनानि अयापयत्। |
| (2) द्वितीयः | - | तत्रैव मठं निर्माय भस्मशय्यायाः समीपे एव वसति। |
| (3) तृतीयः | - | अस्थीनि नित्वा गङ्गादितीर्थं गतः। |

**(ख) विभक्तिपरिचयो देयः।**

(1) द्विजपुत्राः (2) अशक्तः (3) रूपमुग्धाः

(4) भस्मशय्यायाः (5) भार्या (6) त्रयः

**(ग) सन्धिविच्छेदं कुरुत।**

(1) पुनरानेतुमगात् (2) अस्त्येकः (3) तत्रैवावसन्

(4) ततस्ते (5) श्मशान एव (6) तत्रैव

**(घ) सन्धिं कुरुत।**

(1) अतिथिः + भवति (2) सर्वे + अपि (3) अत्र + एव

(4) तत्क्षणम् + एव (5) त्रयः + अपि (6) ते + अन्यस्य

**(ङ) धातुपरिचयो देयः**

(1) अब्रवीत् (2) आसीत् (3) आययुः

(4) चक्रुः (5) अगच्छताम् (6) उच्यते

**छात्रप्रवृत्तिः**

वेतालपञ्चिविंशत्याः अन्याः कथाः पठेयुः।

**अध्यापकप्रवृत्तिः**

- वार्तासंग्रहस्य वेतालपञ्चविंशत्याः वाचनं कारयतु।
- विक्रमादित्यस्य अन्याः अपि प्रसिद्धाः कथाः सन्ति, ताः श्रोतुं छात्राः प्रेरणीयाः।

●

# १३

# कपिञ्जलकृतोपदेशः

**प्रस्तावना**

''बाणोच्छिष्टं जगत् सर्वम्'' पद्यमये काव्यसंसारे यथा कालिदासप्रभृतयः भासन्ते तथैव गद्यमये कविराजबाणः चकास्ति। बाणः कवीनामिह चक्रवर्ती। गद्यकाव्यस्य गहनकाननम् अपि यस्य पद्धत्या, रसवृष्ट्या अलंकारकुसुमैश्च उपवनीकृतं सर्वेषां चेतोहरं वर्तते। उपन्यासरूपेण कादम्बरी बाणस्य अनुपमा रचना अस्ति। अस्मिन् भागद्वये उत्तरभागे महाश्वेतावृत्तांतः वर्तते।

किन्नरमिथुनमनुगच्छन् चंद्रापीडः अच्छोदसरोवरं संप्राप्य तत्रावगाहनपानादिकं विधाय विश्राम्यति। तदानीमेव सुस्वरगीतं श्रुत्वा जिज्ञासया चंद्रप्रभस्थाने चतुर्लिंगात्मकशिवालयं दृष्ट्वा, तत्र च महाश्वेतां दृष्ट्वा तस्याः आतिथ्यम् अंगीकरोति। उभयोः परिचयप्रसंगे महाश्वेता स्वोत्पत्तिं पुण्डरीकेण सह मिलनं च वर्णयति तदा महाश्वेतापुण्डकरीकयोः परस्परं चित्तदेहाकर्षणवेलायां पुण्डरीकसखः कपिञ्जलः मित्रमुद्दिश्य उपदिशति स उपदेशः अद्यतनीययुवकानां कृते जीवनोपयोगी वर्तते। सामान्यतः यदा युवावस्थायां मनोवृत्तिवेगः वायुवेगेन इतस्ततः धावति तदा मनोवृत्तिनियंत्रणं दुष्करं भवति। अस्यामेव अवस्थायां मानवानां कृते प्रशस्तमार्गश्चयनीयो भवति अतः कपिञ्जलस्य वचनानि युवकानां कृते स्वचित्तनियमने उपयोगीनि भवेयुः।

---

हे मित्र पुण्डरीक! भवान् खलु मुनितनयः, अयं कामिनां मार्गः तवानुरूपः नास्ति। क्षुद्रजनक्षुण्णो हि अयं पन्थाः विद्यते। सतां साधूनां धैर्यमेव प्रशस्तं वैभवम् अस्ति। यः सामान्यजनमिव कामादिविकाराकृष्यमाणम् आत्मानं न रूणद्धि सः किं मनुष्यः?

कथमद्य तवायमपूर्वः इन्द्रियाणां विकारः दृश्यमानोऽस्ति। येन त्वं व्यग्रतां प्राप्तः। मनोनिग्रहे यत् धैर्यं पूर्वमासीत् तत् कुत्र गतम्? कन्दर्पकुसुमितवातेऽस्मिन् तव इन्द्रियनिग्रहः कथं शिथिलतां प्राप्तः।

प्राणायामपरायणस्य तव चित्ते यत् वशित्वम् आसीत् तत् कथं परवशीभूतम्? मित्र तव प्रशान्तिः कुत्र गता? परंपरया यमनियमव्रतादिभी रक्षितं ब्रह्मचर्यं कुत्र गतम्। सांसारिकविषयेषु सदा उदासीनस्य तव उत्सुकता कथमाविर्भूता गुरूणां ज्ञानसुधामयाः उपदेशाः सखे कथं विस्मृताः?

ज्ञानसत्रे यच्छ्रुतं तत् कथमद्य नानुस्मरसि? ज्ञानेन तपसा यः विरागः आसीत् सः कथम् अनुरागे परिवर्तितः। योगेन निरुद्धचेतसः विषयभोगे यो विद्वेषः सः कथं नास्ति?

हे मित्र! सुखेषु पराङ्मुखता आसीत् सा कुत्र गता? तपसि अभिरुचिः कथम् अद्य नास्ति? चञ्चलचित्तनियन्त्रणे यत् संयमित्वं तवासीत् तत् कथम् अनियंत्रितं जातम्? भोगानामरुचिः क्व गता?

कुसुमायुधप्रतिकृते तव अद्भुतं यौवनानुशासनं कथं न दृश्यते? अनङ्गोऽपि असौ कामोऽपराजेयः। सखे! सखेदं वदामि यत् अद्य ज्ञानोत्पन्ना प्रज्ञा निष्फला जाता। धर्मशास्त्राणामभ्यासः वृथा भासते। संस्काराणां व्यर्थतामनुभवामि। गुरूणामुपदेशोऽपि कामविग्रहेऽनुपकारकः। प्रबुद्धतापि अर्थहीना जाता ज्ञानमपि निरर्थकं प्रतिभाति।

भवादृशानामपि मुनिकुलावतंसानां तपस्विनां निर्विकारि चित्तं विषयवासनारागधूलिधूसरितं जातम्। प्रमादैश्च परिभूताः भवन्तः। महदाश्चर्यं यत् तवात्र निश्चेतनत्वम्। भवतु, सखे तव माला तु गता किन्तु अनया तव चित्तम् अपह्रीयमाणं पश्यामि तद् रोद्धुं प्रयतस्व।

## शब्दार्थाः

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| **प्रशस्तम्** | = | वरम् | **विकारः** | = | विकृतिः | **कन्दर्पः** | = | कामदेवः |
| **वातः** | = | समीरः, पवनः | **पराङ्मुखता** | = | विमुखता | **परिभूताः** | = | पराजिताः |
| **पन्थाः** | = | मार्गः | | | | | | |

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) साधूनां ………… वैभवः कथितोऽस्ति।

(क) शीलम् (ख) धैर्यम् (ग) सत्यम्

(2) ………… इन्द्रियनिग्रहः शिथिलतां प्राप्तः।

(क) पुण्डरीकस्य (ख) कपिञ्जलस्य (ग) महाश्वेतायाः

(3) ………… निरुद्धचेतसः विषयभोगे विद्वेषः आसीत्।

(क) योगेन (ख) ज्ञानेन (ग) दानेन

(4) भोगानां ………… क्व गता?

(क) उत्सुक्ता (ख) अरुचिः (ग) पराङ्मुखता

(5) ………… व्यग्रतां प्राप्तः?

(क) मुनितनयः (ख) कपिञ्जलः (ग) विकारः

(6) ………… निरर्थकं प्रतिभाति।

(क) अभ्यासः (ख) ज्ञानम् (ग) संस्कारः

(7) ज्ञानसत्रे ………… तत् नानुस्मरसि।

(क) यदुक्तं (ख) यत्श्रुतम् (ग) यत्पठितम्

(8) ………… अभिरुचिः नास्ति।

(क) भोगे (ख) सुखे (ग) तपसि

**2. एकवाक्येन उत्तरं लिखत।**

(1) कादम्बर्या रचिता कः?

(2) कीदृशाः उपदेशाः विस्मृताः?

(3) अनुरागे कः परिवर्तितः?

(4) कस्य हस्तात् माला पतिता?

(5) कपिञ्जलः कस्य व्यर्थताम् अनुभवति?

**3. द्वित्रिवाक्यैः उत्तरं लिखत।**

(1) कपिञ्जलः पुण्डरीकं किमर्थम् उपदिशति?

(2) कपिञ्जलस्य मतेन कः मनुष्यः नास्ति?

(3) तपस्विनां चित्तं कीदृशं जातम्?

**4. सविस्तरमुत्तरं लिखत।**

(1) पुण्डरीकस्य चित्तावस्थां वर्णयतु।

(2) कपिञ्जलमतेन किं किं व्यर्थं जातम्?

**5. प्रदत्तसूचनानुसारं कुरुत।**

**(क) अ - विभागं ब - विभागेन सह योजयत।**

| अ | | ब |
|---|---|---|
| (1) इन्द्रियनिग्रहः | - | विद्वेषः |
| (2) अनङ्गः | - | धैर्यम् |
| (3) प्रबुद्धता | - | सांसारिकविषयेषु |
| (4) उत्सुकता | - | अर्थहीना |
| (5) मनोनिग्रहे | - | अपराजेयः |
| (6) विषयभोगे | - | शिथिलः |

**(ख) समासपरिचयो देयः।**

(1) निरुद्धचेतसः (2) यौवनानुशासनम् (3) विषयभोगः

(4) क्षुद्रजनक्षुण्णः (5) मुनितनयः (6) मनोनिग्रहः

**(ग) सन्धिविच्छेदं कुरुत।**

(1) तवायमपूर्वः (2) नानुस्मरसि (3) अन्याहताम्

(4) महदाश्चर्यम् (5) वातेऽस्मिन् (6) व्रतादिभी रक्षितः

**(घ) सन्धिं कुरुत।**

(1) तव + अनुरूपम् (2) यत् + श्रुतम् (3) अनङ्गः + अपि

(4) ज्ञान + उत्पन्ना (5) कामः + अपराजेयः (6) तव + अत्र

**(ङ) धातुपरिचयो देयः**

(1) रुणद्धि (2) प्रतिभाति (3) नावधारयसि

(4) प्रयतस्व (5) आसीत् (6) भासते

**छात्रप्रवृत्तिः**

कपिञ्जलोक्तमार्गेण स्वमित्राणि वा अन्यान् व्यसनदुष्परिणामविषये बोधयत।

**अध्यापकप्रवृत्तिः**


- कादम्बरीकथोपदिष्टा अन्येऽपि पाठाः यथावसरं पठनीयाः।
- कादम्बर्यां कुत्र कपिञ्जलोपदेशः अस्ति? इति अन्विष्य मूलमपि दर्शयेत्।

# १४

# दानस्य फलमुत्तमम्

**प्रस्तावना**

विद्यते सागरस्यान्तं दानस्यान्तं न विद्यते। इत्यादिना दाधातुना ल्युट्प्रत्ययेन निष्पन्नस्य दानशब्दस्य महत्त्वं ज्ञायते। ''हुतं च दत्तं च तथैव तिष्ठति'' इत्यादिनाऽपि दानस्य अविनाशित्वं प्रतिभाति। प्रायः दृश्यते पर्वणि जनाः मंदिरेषु, दीनेभ्यः, विप्रेभ्यः च दानं कुर्वन्ति, तत्र बहुधा दानविधिज्ञानस्य अभावे फले न्यूनतां प्राप्नोति। ये जनाः स्वकल्याणाय जपहोमार्चनतपःसत्सङ्गादिकर्मसु अशक्ताः, ते केवलं विधिवत् दानेनैव अनन्तगुणितं फलं प्राप्तुमर्हन्ति।



प्रस्तुतोऽयं गद्यांशः महाभारते आश्वमेधिकपर्वणि नवतितमाऽध्यायात् युधिष्ठिरराजसूययज्ञोपाख्यानात् समुद्धृतः। यदा युधिष्ठिरः स्वभ्रातृभिः साकम्, ऋषिभिः सह च विपुलदक्षिणादानपूर्वकं यज्ञं कृतवान्, तदा तस्मिन् राज्ञि दानमदः अजायत। तदानीमेव तत्र एकः नकुलः समपद्यत, यस्य देहार्धं सुवर्णस्यासीत्। पृष्टवत्सु विस्मितेषु जनेषु सः नकुलः सुवर्णार्धदेहकारणं प्रतिपादयन् वदति यत् कस्यचित् सपरिवारस्य क्षुत्क्षामदेहस्य द्विजवरस्य बहुदिनेभ्यः कुतोऽपि किञ्चिदन्नप्राप्तिः जाता, तदानीमेव समागतयाचकेभ्यः ते धर्मप्रियाः क्षुधिताः सन्तोऽपि स्व-स्वभागं प्रयच्छन्ति, तद्दानप्रभावेण भिक्षुकाणामुच्छिष्टलेपनेन मम शरीरार्धं सौवर्णं जातम्, किन्तु एतावति महति युधिष्ठरराजसूययज्ञे नैकर्षिगणसेविते भूरि-दक्षिणामये यद्भोजनोच्छिष्टलेपनेनापि मम शेषार्धशरीरं सौवर्णं राजतं वा नाऽभवत्, अतः विप्रपरिवारस्य दानयज्ञफलं श्रेष्ठतरं वर्तते। अनेन प्रसङ्गेण दानस्य महत्त्वं सामाजिकानाम् उपयोगि भवेदिति हेतोः गद्यांशः समुद्धृतः।

---

''दानेन प्राप्यते स्वर्गः'', न तु सङ्ग्रहेण। समुद्रो यथा जलसंग्रहेण रसातलं प्राप्तः, किन्तु वारिदाः घनाः सदा उच्चस्थाः गर्जन्ति। दानमेव हस्तस्य भूषणं कथितमस्ति। शास्त्रेषु विद्या-भूमि-गो-कन्यादिदानस्य भूरि महिमा वर्णितः अस्ति। ये दानं न कुर्वन्ति ते याचकाः भवन्ति।

यत्फलं व्रतेन, तपसा, यज्ञेन, जपेन वा प्राप्यते तत्फलं केवलं दानेनैव प्राप्तुं शक्यते। एतावत् दानस्य महत्त्वं ज्ञात्वा शास्त्रेषु तस्य षडङ्गानि कथितानि सन्ति। दाता, प्रतिगृहिता, श्रद्धा, धर्मयुक्तं देयम्, देशः कालश्चेति षट् अङ्गानि सन्ति। षडङ्गज्ञानेन विना दाता यथोक्तफलभाग् न भवति। सच्छ्रद्धया दानमात्रेण द्विजः सपरिवारः स्वर्गतिं गतः। एकदा

कश्चन तपोनिष्ठः द्विजपरिवारः बहुदिनेभ्यः अन्नाद्यभावे क्षुधितः आसीत्। विप्रगृहे तत्पुत्रवधूः गर्भिणी च आसीत्। तदा कुतोऽपि भिक्षायां प्राप्तान्नेन यावत् ते भोक्तुं प्रवृत्ताः तावदेव कश्चन भिक्षुः समागत्य याचनां कृतवान्, प्रसन्नचेतसा तेन विप्रेण स्वकीयभागः भिक्षवेऽर्पितः। सहसागतद्वितीयाय भिक्षवे तस्य धर्मपत्न्याऽपि स्वभागः प्रदत्तः। पुत्रेणाऽपि आगताय तृतीयाय याचकाय अन्नं दत्तम्। तत्रावसरे पुत्रवधूं दृष्ट्वा सर्वे चिन्तायुक्ता अभवन् तावदागताय याचकाय पुत्रवध्वाऽपि प्रसन्नचित्तेन स्वभागः दत्तः, तेषाम् एतावति संकटेऽपि श्रद्धा न विचलिता। एतद् दृष्ट्वा भिक्षुरूपेण समागताः ऋषयः प्रसन्नाः जाताः एवं तेभ्यः स्वर्गाशिषं प्रायच्छन्।

तेषां याचकानाम् उच्छिष्टलेपनमात्रेण श्रद्धायुक्तदानप्रभावेण च मम देहार्धभागः सुवर्णमयः जातः, किन्तु युधिष्ठरयज्ञे तथा न जातम्। अनेन ज्ञायते यत् सुतकलत्रस्नेहमनपेक्ष्य स्वप्रियतमवस्तुनः दानं यः करोति स उत्तमः दाता भवति।

स्वर्गद्वारं दुर्गमं सुसुक्ष्मं च वर्णितमस्ति, तत्र ये दानिनः ते विमलवपुषः निर्बाधं नन्दनवनं प्रविशन्ति न तु मोहपाशेन बद्धाः जनाः।

कदा देयम्? किं देयम्? कस्मै दैयम्? जिज्ञासायां शास्त्रवगाहनेन ज्ञायते यत् ''सहस्रशक्तिश्च शतं शतशक्तिर्दशापि च''। अर्थात् सहस्रदानसामर्थ्यवता नरेण शतं देयमेव। दशांशत्यागात्मकं दानं कर्तव्यम्। श्रद्धया देयम्, अश्रद्धया न देयम्। रन्तिदेवो नाम नृपतिः अष्टचत्वारिंशत् दिनानि जलाशी भूत्वा समागताय याचिकाय अप एव दत्त्वा स्वर्गारोहणं कृतवान्। शुद्धभावेन श्रद्धया केवलम् अम्भसा दत्तेन महत्फलं प्राप्तम्।

दानमपि योग्यपात्रायैव दातव्यं भवति पात्ररहिताय दानं निष्फलं प्रोक्तम्। ''पतनात् त्रायते यस्मात् तस्मात् पात्रं प्रचक्षते'' यदि दातुः समीपे एव कश्चन मूर्खो वसति, एवं पात्रतावान् बहुश्रुतः दूरे च वसति चेत्, वरं दूरं गत्वापि पात्राय देयमपात्राय न देयम्।

श्राद्धकालेऽपि श्राद्धान्नदानवेलायां यदि योग्यं पात्रं न लभ्यते चेत् श्राद्धान्नस्य जले प्रक्षेपः कर्तव्यः, न त्वपात्राय।

दानमपि प्रतिगृहीतारं प्रति गत्वा दीयते तदनन्तफलप्रदम् अस्ति। विप्रमाहूय दत्तं दशशतगुणितम् एवं याचनान्तरं दत्तं केवलमर्धफलप्रदम्।

दानवेलायां द्रव्यस्य नाम गृहीत्वा ददानि इति चोक्त्वा तोयं दद्यात् इति दानविधिः। परवित्तानि अपहृत्य ये दानं कुर्वन्ति ते निश्चितं नरकं यान्ति।

नृगो नाम नृपतिः द्विजेभ्यो गोप्रदानसहस्राणि कृत्वाऽपि कृकलासयोनिमाप्तवान्, कारणं तेन भूपेन एकस्मै विप्राय दत्ता धेनुः कथमपि स्वस्य एव गोष्ठे प्रतिनिवर्तिता, एतदजानता तेन राज्ञा सा धेनुः अन्यस्मै द्विजाय प्रदत्ता। उभयोरपि ममायं ममायमिति विग्रहे जाते वृत्तान्तस्य फलरुपेण गतप्राणस्य नृपतेः कृकलासयोन्यां पतनं जातमिति।

अतः अजानता अपि दानदोषेण जनः पापयोनिमाप्नोति। कश्चन सुवर्णं ददाति, कश्चन केवलं जलम् एव ददाति उभयोः तुल्यफलता वर्तते।

यथा बहुगोषु वत्सः स्वमातरम् अन्विष्य प्राप्नोत्येव तथैव यस्य यद् दत्तम् तद् तस्योपतिष्ठते। ''सङ्क्रान्तौ व्यतीपाते च दत्तं भवति चाक्षयम्'' इति प्रशस्तदानकालोऽपि वर्णितोऽस्ति। यदा चित्तं श्रद्धायुक्तं जायते, यत्र सत्पात्रं लभ्यते तदा तत्र सद्यः दानं देयम्।

दानस्योत्तमफलं अनेनैव ज्ञायते यत् यः दुर्भिक्षेऽन्नदानं करोति, यश्च सुभिक्षे सुवर्णवस्त्रदानं करोति, तौ द्वावपि सूर्यमण्डलं भित्त्वा स्वर्गामिनौ भवतः।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| **दाता** | = दानकर्ता | **प्रतिगृहीता** | = दानग्राही | **नन्दनवनम्** | = स्वर्गस्य उद्यानम् |
| **व्यतीपातः** | = एकः योगः, | **तपोनिष्ठः** | = तपस्वी | **जलाशी** | = जलम् एव भोजनम् अस्य |
| **दुर्भिक्षे** | = अनावृष्टौ | **उच्छिष्टे** | = भुक्तावशिष्टे | **कृकलासः** | = सरटः इति भाषायाम्। |

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) ........... अभावेन दानस्य फले न्यूनतां प्राप्नोति। (द्रव्यस्य, संकल्पस्य, दानविधिज्ञानस्य)

(2) ........... च ........... तथैव तिष्ठति। (भुक्तं-पीतम्, हुतम्-दत्तम्)

(3) दानस्य ........... अङ्गानि सन्ति। (पञ्च, षट्, त्रीणि)

(4) ........... देहार्धं सुवर्णमयं जातम्। (विप्रस्य, नकुलस्य, राज्ञः)

(5) ........... नाम नृपतिः जलदानेन स्वर्गं प्राप्तवान्। (युधिष्ठिरः, नृगः, रन्तिदेवः)

(6) विप्रमाहूय दत्तं ........... फलप्रदं वर्तते। (शतगुणितम्, दशगुणितम्, द्विगुणितम्)

(7) नृगो नाम नृपतिः दानदोषेण ........... योनिमाप्तवान्। (धेनु, कृकलास, कुक्कुर)

(8) संक्रान्तौ ........... च दत्तं भवति चाक्षयम्। (ग्रहणे, पर्वणि, व्यतीपाते)

**2. एकवाक्येन प्रश्नानाम् उत्तराणि लिखत।**

(1) याचनान्तरं दानस्य फलं कीदृशं भवति?

(2) स्वर्गद्वारं कीदृशमस्ति?

(3) सहस्त्रशक्तिः कियत् दद्यात्?

(4) कः उत्तमदाता वर्तते?

(5) रन्तिदेवः कति दिवसावधिः जलाशी आसीत्?

(6) हस्तस्य भूषणं किम् अस्ति?

**3. द्वित्रिवाक्यैः उत्तरं लिखत।**

(1) दानस्य षडङ्गानि लिखित्वा परिचयं लिखत।

(2) दानविधिं लिखत।

(3) कस्मै दानं न देयम्?

**4. सविस्तरमुत्तरं लिखत।**

(1) नृगस्य कः दानदोषः आसीत्?

(2) नकुलस्य शरीरार्धं कथं सौवर्णम् अभवत्?

(3) दाने पात्रतायाः महत्त्वं प्रतिपादयत।

**5. प्रदत्तसूचनानुसारं कुरुत।**

**(क) अ विभागं ब विभागेन सह योजयत।**

| अ | ब |
|---|---|
| (1) युधिष्ठिरः | न देयम् |
| (2) नृगः | राजसूयः |
| (3) रन्तिदेवः | देयम् |
| (4) श्रद्धया | गोदानम् |
| (5) अश्रद्धया | पात्रम् |
| (6) पतनात् त्रायते | जलदानम् |

**(ख) विभक्तिपरिचयो देयः।**

| | | |
|---|---|---|
| (1) अम्भसा | (2) विमलवपुषः | (3) बहुगोषु |
| (4) अजानता | (5) स्वर्गामिनी | (6) पात्रतावान् |

**(ग) सन्धिविच्छेदं कुरुत।**

| | | |
|---|---|---|
| (1) तस्योपतिष्ठते | (2) तदनन्तफलप्रदम् | (3) पात्रायैव |
| (4) प्रायच्छन् | (5) षडङ्गानि | (6) सच्छ्रद्धया |

**(घ) सन्धिं कुरुत।**

| | | |
|---|---|---|
| (1) च उक्त्वा | (2) प्राप्नोति एव | (3) वर्णितः अस्ति |
| (4) द्वौ अपि | (5) केवलम् अम्भसा | (6) कुतः अपि |

**(ङ) धातुपरिचयो देयः।**

| | | |
|---|---|---|
| (1) अर्हति | (2) अयच्छन् | (3) यान्ति |
| (4) उपतिष्ठते | (5) सन्ति | (6) आप्नोति |

**छात्रप्रवृत्तिः**

दानिनां (कर्णादीनाम्) कथाः वर्गखण्डे प्रस्तोतव्याः।

**अध्यापकप्रवृत्तिः**

दानसम्बन्धिनीः सूक्तीः एकत्रीकर्तुं छात्रान् प्रेरयेत्।

●

# १५

# गुरुशिष्ययोः संवादः

**प्रस्तावना**

संस्कृतभाषा न केवलं भारतवर्षस्य अपितु विश्वस्य अनेकानां भाषाणां जननी अस्ति। अस्यां भाषायां सर्वाधिकस्य वाङ्मयस्य संरचना जाता। एषा भाषा अतीव वैज्ञानिकी विद्यते। भारतीय संस्कृतिविकासे सर्वप्रथमं स्थानं संस्कृतभाषाया एव वर्तते। ऋग्वेदादारभ्योपनिषत्पुराणोपपुराण-रामायण-लौकिकसंस्कृत-पर्यन्तं सर्वविषया अस्यां भाषायां समुपलभ्यन्ते। अतः संस्कृतभाषायाः उपयोगिता अद्यापि प्राचीनकालवत् अतीव अस्ति।

अस्मिन् गद्ये गुरुशिष्ययोः संवादे संस्कृतस्य महत्त्वं, संस्कृतं किमर्थं पठनीयं, संस्कृतपठनेन के के लाभाः सन्ति तथा च संस्कृते आजीविकायाः स्थानानि कानि चेति बहुविधं वस्तु संवादरूपेण वर्तते। तेन संस्कृतविद्यार्थिनां अतीव लाभः भवेत् इति।

---

एकस्यां संस्कृतपाठशालायां दशमकक्षायां सर्वे छात्राः स्वकीयस्य व्यावसायिकविषयस्योपरि चर्चां कुर्वन्ति स्म। छात्राः उद्विग्नमानसाः भूत्वा परस्परं वादं कुर्वन्ति स्म। तदैव गुरुः समागतः ततः गुरुशिष्ययोः मध्ये एवं संवादः अभूत्-तद्यथा।

**छात्राः** - सनति सुप्रभातम्, गुरवः!

**गुरुः** - सुप्रभातं छात्राः! यूयं किमर्थं वृथावादं कुरुथ?

**देवदत्तः** - वयं सर्वे उद्विग्नमनसः स्मः। वयं विचारयामः किमर्थं संस्कृतं पठनीयम्?

**गुरुः** - साधु पृष्टं त्वया वत्स! ध्यानपूर्वकं शृणोतु। वस्तुतः अनया भाषया खलु सर्वेषां भारतीयानां मानसं एकस्मिन् सूत्रे निबद्धं कर्तुं शक्यते। संस्कृतभाषायाः साहित्यभण्डारोऽपि विपुलः ज्ञानविज्ञानसम्पन्नोऽस्ति। संपूर्णं वैदिकं साहित्यम् आध्यात्मिकज्ञानविज्ञानस्याकरो वै वर्तते। माधुर्यमस्याः भाषायाः महत्त्वपूर्णा विशेषता। अनेक दृष्ट्या अस्याः भाषायाः उपयोगिता विद्यते। युगेऽस्मिन् ''कम्प्युटर'' नाम यंत्रस्य कृते संस्कृतभाषायाः आनुकूल्यं सर्वथा उद्घोषितं डिण्डिमघोषेण। अतः भविष्यकाले ''कम्प्युटरयन्त्रं'' चालनाय अस्याः भाषायाः महत्वं निःसंदिग्धम् इति मन्यते।

**देवदत्तः** - तत्तु सत्यमेव। संस्कृतस्य ईदृशम् अभूतपूर्वं महत्त्वं ज्ञात्वा आनन्दः सञ्जातः।

**विनायकः** - किन्तु अस्मिन् स्पर्धात्मके युगेऽपि संस्कृतस्य उपयोगिता वर्तते किम्?

**गुरुः** - आम् वर्तते एव। संस्कृतस्य उपयोगः तु सर्वत्र वर्तते। संस्कृतम् अध्येतारः छात्राः योग्यताक्रमेण अग्रगामिनः भवन्ति। अनया एव विशेषतया सर्वासु परीक्षासु उच्चप्रशासनिकसेवायाः परीक्षासु अपि अस्याः भाषायाः उपयोगिता सुस्पष्टा खलु। एकस्मिन् सर्वेक्षणे अखिलभारतीयस्तरे आयोजितासु प्रतियोगितासु संस्कृतविषयम् अधिगृह्य सर्वच्छात्राणां संख्या प्रतिशतं त्रिंशत् वा ततोऽप्यधिकं वर्तते। अतः सततं संस्कृतं पठनीयम्।

**विनायकः** - वर्तमाने युगेऽपि संस्कृतस्य ईदृशीम् उपयोगितां ज्ञात्वा अहम् अपि संस्कृतं पठिष्यामि।

**उपमन्युः** - गुरुचरणाः! संस्कृतपठने के के लाभाः सन्ति? तदस्मभ्यं कथयन्तु।

**गुरुः** - संस्कृतपठने अनेके लाभाः सन्ति। यथा आयुर्वेदज्योतिषवेदादिक्षेत्रे प्रगतिं कर्तुं संस्कृतमावश्यकं तथा गाणितिकविषये वैदिकगणितस्य उपयोगिता अधुनाऽपि भवत्येव। मनुस्मृति-शुक्रनीति-विदुरनीतीत्यादयः प्रमुखाः। राजनीतिग्रन्थाः संस्कृतभाषायामेवोपनिबद्धा दृश्यन्ते। आयुर्वेदः, अर्थशास्त्रं, राजनीतिः एतेषां शास्त्राणां पठनपाठनम् आजीविकायाः कृते सहायकम् भवति। एषा भाषा सर्वेषां धर्माणां धात्री इव, सार्वभौमिकानां विधानानां विधात्री खलु विश्वबन्धुत्वादिभावानाम् उद्भावयित्री ननु, अतः सर्वदा संस्कृतं पठनीयम्।

**उपमन्युः** - आम् आम्, इदं तु मयाऽपि ज्ञायते यत् कर्मकाण्डे, वास्तुशास्त्रे तथा ज्योतिषादिषु अर्थकरेषु व्यवसायेषु संस्कृतभाषायाः आवश्यकता वर्तते।

**आरुणिः** - गुरुचरणाः! वर्तमाने युगेऽपि संस्कृतपठनेन व्यवसायसम्बद्धाः अनेके लाभाः प्राप्यन्ते?

**गुरुः** - संस्कृतभाषायाः व्यावसायिकं दाक्ष्यं प्राप्यते। युगेऽस्मिन् आजीविकालब्धये संस्कृतं सर्वथा योग्यमस्ति। यथा संस्कृतपठनान्तरं संस्कृतज्ञः संस्कृतविद्यालये, महाविद्यालये अध्यापकत्वेन आजीविकां प्राप्तुं शक्नोति। संस्कृतज्ञाः भौतिक-अनुसंधानक्षेत्रे, आयुर्वेदस्य अध्ययनक्षेत्रे तथा च अनुवादकरूपेण शासनस्य प्रथमवर्गस्य द्वितीयवर्गस्य अधिकारिरूपेण आजीविकां प्राप्नुवन्ति। भारतीयसैन्ये राज्यगुरुः इत्यस्य पदस्योपरि संस्कृतज्ञः आजीविकां प्राप्तुं शक्नोति।

**सिद्धार्थः** - हे महोदय! संस्कृतभाषायाम् अभ्युन्नत्यै अस्माकं कर्तव्यं ज्ञापयतु।

**गुरुः** - संस्कृतभाषायाम् अभ्युन्नत्यै सर्वेषां कृते सामान्यं संस्कृताध्ययनम् आवश्यकं कर्तव्यम्। संस्कृतभाषायाः प्रचाराय संस्कृतस्य नवीनविद्यालयानां, महाविद्यालयानां च स्थापना करणीया। अप्रकाशितपुस्तकानां प्रकाशनं कर्तव्यम्। प्राचीन-पुस्तकानां सुलभानि संस्कारणानि भवेयुः। संस्कृतभाषायाम् आधुनिकविज्ञानसंबन्धिनो विषयानवलम्ब्य ग्रन्थानां रचना करणीया। संस्कृतभाषाप्रयोगशाला रचनीया। संस्कृतस्य संवर्धनाय एतादृशानि कर्त्तव्यानि सर्वेषां कृते करणीयानि।

**सिद्धार्थः** - अहो! धन्याः वयं धन्या एषा भारती। वयं प्रतिजानीमः यत् भारतस्य संस्कृतस्य च भविष्यनिर्माणाय संस्कृतपठनपाठनं च करिष्यामः।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| **उद्विग्नमानसाः** | = | व्याकुलचित्तयुक्ताः | **आनुकूल्यम्** | = | अनुकुलस्य भावः |
| **उद्घोषितम्** | = | घोषणा | **निःसंदिग्धम्** | = | निःसन्देहम् |
| **अध्येतारः** | = | विद्यार्थिनः | **अधिगृह्य** | = | प्राप्य |
| **आजीविका** | = | वृत्तिः | **विधात्री** | = | निर्मात्री |
| **उद्भावयित्री** | = | जन्मदात्री | **अनुसंधानक्षेत्रे** | = | संशोधनक्षेत्रे। |

## स्वाध्यायः

1. **कोष्ठकप्रदत्तविकल्पेभ्यः योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) ......... मध्ये संवादः जायते? (गुरुशिष्ययोः, शिष्ययोः, अध्यापकयोः)

(2) शिष्याः सर्वे ......... सन्ति? (प्रसन्नचित्ताः, रुग्णाः, उद्विग्नमनसः)

(3) ......... साहित्यभण्डारः विपुलः अस्ति? (संस्कृतभाषायाः, आङ्ग्लभाषायाः, हिन्दीभाषायाः)

(4) युगेऽस्मिन् ......... कुले संस्कृतभाषायाः आनुकूल्यं वर्तते? (दूरभाषस्य, कम्प्युटरस्य, दूरदर्शनस्य)

(5) अखिलभारतीयस्तरे आयोजितासु प्रतियोगितासु संस्कृतछात्राणां संख्या ......... प्रतिशतम्।
(त्रिंशत्, चत्वारिंशत्, पञ्चाशत्)

(6) गाणितिकविषये ......... उपयोगिता अधुनाऽपि भवत्येव? (भूमित्याः, वैदिकगणितस्य, बीजगणितस्य)

(7) भारतीयसैन्ये ......... पदे संस्कृतज्ञाः आजीविकां प्राप्तुं शक्नुवन्ति? (कर्नलस्य, मेजरस्य, राज्यगुरोः)

(8) सर्वेषां कृते ......... अध्ययनम् आवश्यकं वर्तते? (संस्कृतस्य, आङ्गलभाषायाः, गुर्जरभाषायाः)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) संस्कृतभाषायाः महत्त्वपूर्णा विशेषता का अस्ति?

(2) संस्कृतभाषायाः अभ्युन्नत्यै का रचनीया?

(3) आधुनिकविज्ञानसंबन्धिनो विषयानवलम्ब्य केषां रचना करणीया?

(4) संस्कृतभाषा सर्वेषां धर्माणां किम् अस्ति?

(5) केषु अर्थकरेषु व्यवसायेषु संस्कृतभाषायाः आवश्यकता वर्तते?

**3. द्वित्रिवाक्यैः उत्तरं लिखत।**

(1) संस्कृतभाषायाः प्रचाराय किं करणीयम्?

(2) संस्कृतपठनान्तरं संस्कृतज्ञः कुत्र आजीविकां प्राप्तुं शक्नोति?

(3) के के प्रमुखाः राजनीतिग्रन्थाः संस्कृतभाषायामेवोपनिबद्धा दृश्यन्ते?

**4. सविस्तरमुत्तरं लिखत।**

(1) संस्कृतपठने के के लाभाः सन्ति?

(2) वर्तमाने युगे संस्कृतपठनान्ते समुपलब्धात् व्यावसायिकान् लाभान् लिखन्तु?

(3) संस्कृतभाषायाम् अभ्युन्नत्यै अस्माकं कर्तव्यं ज्ञापयतु?

**5. (क) विभक्तिपरिचयो देयः।**

| | | |
|---|---|---|
| (1) भारतीयानाम् | (2) आजीविकायाः | (3) निबद्धम् |
| (4) उद्भावयित्री | (5) डिण्डिमघोषेण | (6) भाषायाः |

**(ख) सन्धिविच्छेदं कुरुत।**

| | | |
|---|---|---|
| (1) मयापि | (2) सम्पन्नोऽस्ति | (3) सर्वच्छात्राणाम् |
| (4) विषयानवलम्ब्य | (5) भाषायामेवोपनिबद्धा | (6) भवत्येव |

**(ग) सन्धिं कुरुत।**

| | | |
|---|---|---|
| (1) युगे + अस्मिन् | (2) तत् + यथा | (3) अधुना + अपि |
| (4) सम्पन्नः + अस्ति | (5) विषयस्य + उपरि | (6) अद्य + अपि |

**(घ) धातुपरिचयो देयः**

| | | |
|---|---|---|
| (1) शक्यते | (2) मन्यते | (3) दृश्यन्ते |
| (4) प्राप्यन्ते | (5) शक्नोति | (6) ज्ञापयतु |

**छात्रप्रवृत्तिः**

संस्कृतस्य उपयोगिता कुत्र कथं च अस्ति इति परस्परं चर्चा कृत्वा पत्रनिर्माणं कुरुत।

**अध्यापकप्रवृत्तिः**

संस्कृतभाषायाः व्यावहारिकोपयोगाय व्यवहारे उपयुक्तानां वस्तूनां संस्कृतनामानि कथयेयुः। फलकनिर्माणं कर्तुं शक्यते।

●

# (१६)

# लौकिकन्यायाः

**प्रस्तावना**

विपुलतरविग्रहेऽस्मिन् संस्कृत-साहित्ये न्यायशब्दः बहुषु अर्थेषु प्रयुक्तोऽस्ति। आपटे महोदयेन विरचिते संस्कृत - आङ्गलकोशे न्यायशब्दस्य नियमः, न्यायिक-आदेशः, तर्कशास्त्रम्, साकल्येन कृता युक्तिः इत्यादयः चतुर्दश अर्थाः समुपदर्शिताः सन्ति। एषु ''तर्कशास्त्रम्'' इति अर्थः बहु प्रसिद्धोऽस्ति।

पाठेऽस्मिन् प्रयुक्तः न्यायशब्दः युक्तिमूलकदृष्टान्तविशेषे अभिहितो वर्तते। लोकजीवने जातानाम् अनुभवानां सारं संगृह्य दृष्टान्तद्वारा सारं प्रकटयन्ती सूत्ररूपा, वाक्यरूपा, शब्दसमूहरूपा अभिव्यक्तिः एव लौकिकन्यायशब्देन व्यपदिश्यते। लोकदृष्टान्तद्वारा सारल्येन सारतत्त्वम् अवबोधयितुम् एतेषां लौकिकन्यायानां प्रयोगः भवति। इमे न्यायाः लोके जायमानानाम् अनुभवानां प्रतिपादनमुखेन नीत्युपदेशज्ञानप्रदाश्च भवन्ति। यथा सूक्तयः, सुभाषितानि, विविधाः कथाः लोकव्यवहारप्रतिपादनद्वारा रीति-नीति-संस्कृतीनां ज्ञानं ददति, तथैव इमे लौकिकन्यायाः अपि।

लौकिकन्यायेषु लोकधर्मस्य संग्राहकं तत्त्वं परितः विलसति। अतः इमे न्यायाः सामान्यजनानां कृते अपि बोधदायकाः उपकारकाश्च भवन्ति। तस्मात् ''छात्राणां मार्गदर्शकाः भवेयु''रिति धिया तादृशाः एव केचन न्यायाः पाठेऽस्मिन् उपस्थाप्यन्ते।

**अतिपरिचयन्यायः -**

''**अतिपरिचयेन प्रेमापेक्षया नितराम् अपमानम् एव जायते**'' इति अस्य न्यायस्य अर्थः।

यथा चन्दनतरोः काष्ठानि अतीव - सुमधुर - सुगन्धदायीनि बहुमूल्यवन्ति च भवन्ति। तानि काष्ठानि न सर्वत्र उपलभ्यन्ते । (चन्दनं न वने वने) मलयपर्वते चन्दनकाष्ठानि प्राचुर्येण उपलभ्यन्ते। तस्मात् कारणात् तैः साकम् अतिपरिचयात् तत्रत्याः भिल्लमहिलाः चन्दनकाष्ठानां बहुमूल्यम् अज्ञात्वा तेषाम् इन्धनरूपेण उपयोगं कुर्वन्ति।

**यथा-**

**अतिपरिचयादवज्ञा सन्ततगमनादनादरो भवति।**
**मलये भिल्लपुरन्ध्री चन्दनतरुकाष्ठमिन्धनं कुरुते॥**

यथा वा गङ्गानद्याः जलम् अतीव-पावनं भवति। जनाः तत्समीपवर्तिभ्यः तीर्थेभ्यः गङ्गाजलं समानीय बहुतिथं कालं यावत् स्वगृहे रक्षन्ति। पवित्रकार्येषु च तस्य उपयोगं कुर्वन्ति। किन्तु गङ्गानद्याः निकटवासिनः तज्जलं भोजनपात्राणां प्रक्षालनादिकार्येषु उपयुञ्जते। अतः अतिपरिचयात् व्यक्तेः सन्मानं हीयते इति अस्य न्यायस्य तात्पर्यम् अस्ति। तथा चोक्तमपि **श्रीमद्यागवतेः**-

**सन्निकर्षो हि मर्त्यानामनादरणकारणम्।**
**गाङ्गं हित्वा यथान्याम्भास्तत्रत्यो याति शुद्धये॥**

**श्रीमद्भागवतम् 10-84-31**

**काचमणिन्यायः -**

मणिकाचयोः दर्शने प्रायशः साम्यं भवति। किन्तु तज्ज्ञानां परीक्षाकाले उभयोः तारतम्यात् ''अयं काचः'' ''मणिश्चायम्'' इति भेदः निश्चीयते। इत्थं केवलबाह्यदर्शनेन संवादिभ्रमेण कस्यापि उत्तमत्वम् अधमत्वं च न ज्ञायते इति भावः।

तदुक्तम्-

**मणिर्लुठति पादाग्रे काचः शिरसि धार्यते।**
**क्रयविक्रयवेलायां काचः काचो मणिर्मणिः ॥**

**तक्रकौण्डिन्यन्यायः -**

भोजनकाले आदिश्यते - ''ब्राह्मणेभ्यो दधि दीयताम्, तक्रं कौण्डिन्याय'' इति। तदा वस्तुतस्तु कौण्डिन्योऽपि ब्राह्मण एवास्ति। एवं सत्यपि कौण्डिन्यशब्दस्य पृथगुपादाने किमपि विशिष्टं प्रयोजनं भवति। एतादृशे स्थले सामान्यशास्त्रस्य विशेषशास्त्रेण बाधः जायते। तस्माच्च विशेषशास्त्रबाधात् सामान्यशास्त्रस्य प्रवर्तनं न भवति। अतः सर्वेभ्यः ब्राह्मणेभ्यः दधि, किन्तु कौण्डिन्यनामधारिणे ब्राह्मणाय तक्रमेव दीयताम् इति अर्थः। अत्र विशिष्टतक्रविधानं सामान्यदधिविधानस्य निवर्तकं भवतीति आशयः अयमेव न्याय उत्सर्गापवादन्याय इति नामान्तरेणाप्युच्यते।

**सूचिमुखन्यायः**

अस्य न्यायस्य पृष्ठतः एका कथास्ति - कस्मिंश्चित् पर्वते वानराः शीतकाले शैत्येन वेपमानशरीराः आसन्। अथ ते वानराः तापं काङ्क्षन्तः वह्निफलसदृशानि गुञ्जाफलानि अवचित्य अग्न्यअभिलाषेण फूत्कुर्वन्ति स्म। तत्रावसरे सूचिमुखनामा कोऽपि पक्षिविशेषः, इतरैः वृद्धपक्षिभिः निवार्यमाणोऽपि भूयो भूयः तान् वानरान् उपदिदेश- ''एतस्मात् शीतरक्षा न भविष्यति, अन्यं मार्गं मार्गयन्तु।'' तदानीं केनचित् कुपितेन वानरेण सः तत्रैव व्यापादितः। अतः अयोग्याय प्रदत्तः उपदेशः शिवाय न कल्प्यते इति बोधयितुमयं न्यायोऽस्ति ।

**उक्तमपि-**

**''उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये''-पञ्चतन्त्रे 1-4-20**
**''नापृष्टः कस्यचिद् ब्रूयात् न चान्यायेन पृच्छतः'' - मनुस्मृति 2-110**

**पयोमुखविषकुम्भन्यायः -**

यदि कस्यचिद् कुम्भस्य उपरिष्टाद् एव दुग्धं स्यात् किन्तु अन्तः विषं स्यात् चेत् तादृशः कुम्भः प्राणघातकः हानिकारश्च भवति। समाजेऽपि तादृशाः जनाः भवेयुः, येषां मुखात्तु दुग्धमधुराः वाचः स्यन्दन्ते किन्तु तेषां हृदये कुटिलता भवति। अतः तादृशानां जनानां दूरतो वन्दनं श्रेयस्करं भवति इति अनेन न्यायेन प्रतिपाद्यते। अस्य न्यायस्य प्रतिपादकं सुभाषितमप्यस्ति।

**यथा-**

**परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।**
**वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ॥**

**दृष्टिसृष्टिन्यायः**

भगवता प्रजापतिना सृष्टमिदं जगत्, प्रजापतौ सुप्ते सति स्वपिति एवं जागृते च जागर्ति ।

**यथोक्तम्-**

**यदा स देवो जागर्ति तदेदं चेष्टते जगत्।**
**यथा स्वपिति शान्तात्मा तदा सर्वं निमीलति॥ - मनुस्मृतिः 1-52**

एवमेव अस्माकम् अज्ञानकल्पितं विश्वं व्युत्थाने आविर्भवति सुषुप्तावस्थायां च अज्ञाने लीयते इति अस्य न्यायस्य आशयः।

एवं दृष्टिसृष्टिन्यायेन अस्मत्कल्पितोऽयं प्रपञ्चः अस्मत्सुषुप्तौ लीयते अस्मत्प्रबोधे च यथापूर्वं प्रादुर्भवति। एतन्न्याय सन्दर्भिणी सूक्तिकणिकापि विलसति।

**यथा-**

''उन्मीलने नयनयोर्जगदस्ति भव्यं सम्मीलते नयनयोर्नहि किञ्चिदस्ति'' इति।

**मलिनदर्पणन्यायः -**

दर्पणः स्वकीयनैसर्गिकरूपेण स्वच्छ एव भवति। स्वच्छता हि तस्य अन्यतमः गुणः अस्ति। किन्तु स एव यदा धूलिभिः धूसरितो भवति तदानीं मलिनः जायते। एवं सज्जनोऽपि दुर्जनसङ्गत्या दुष्ट भवति अतः संसर्गकारणादेव गुणदोषाः प्रभवन्तीति अस्य न्यायस्य तात्पर्यम्। निम्नोक्तसूक्तिद्वयेऽपि अयमेव आशयः।

**''संसर्गजा दोषगुणाः भवन्ति''**

**''प्रायेणाधममध्यमोत्तमगुणाः संसर्गतो देहिनाम्'' ॥ नीतिशतके 58॥**

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **स्वच्छन्दी** = स्वैरविहारी (स्वविचारानुसारं वर्तमानः), | | **अम्भसा** = जलेन | |
| **संवादिभ्रमेण** = समानतामोहात् | | **भूयो भूयः** = पुनः पुनः | |
| **व्यापादितः** = हतः | **शिवाय** = कल्याणाय | **नैसर्गिकरूपेण** = स्वाभाविकरूपेण | |

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) ...... अनुकरणं साधु भवति। (शिष्टस्य, दुर्जनस्य, न्यायस्य)

(2) उपदेशो हि मूर्खाणां ...... न शान्तये। (शिवाय, सन्मानाय, प्रकोपाय)

(3) अतिपरिचयात् ...... जायते। (सन्मानम्, यशः, अपमानम्)

(4) सामान्यशास्त्रस्य ...... शास्त्रेण बाधो भवति। (विशेष, तर्क, धर्म)

(5) अज्ञानकल्पितं विश्वं ...... आविर्भवति। (व्युत्थाने, सुषुप्तौ, प्रलये)

(6) तक्रकोण्डिन्यन्यायस्य नामान्तरं ...... अस्ति। (सूचीकटाहन्यायः, उत्सर्गापवादन्यायः, ब्राह्मणन्यायः)

(7) ...... चन्दनकाष्ठानि उपलभ्यन्ते। (मलयपर्वते, हिमालये, इन्द्रलोके)

(8) सज्जनः दुर्जनसङ्गत्या ...... भवति। (धिक्कृतः, शिष्टः, दुष्टः)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) कस्मादनादरो भवति?

(2) कीदृशः कुम्भः प्राणघातकः हानिकारकश्च भवति?

(3) लौकिकन्यायः अर्थात् किम्?

(4) अन्धः किमर्थं कूपे पतति?

(5) सामान्यशास्त्रस्य बाधः केन भवति?

**3. द्वित्रिवाक्यैः उत्तरं लिखत।**

(1) अन्धकूपन्यायः किं बोधयितुं प्रयुज्यते?

(2) मलिनदर्पणन्यायस्य कः आशयः?

(3) परोक्षे कार्यहन्तारम्....। इति श्लोकं पूरयत।

**4. सविस्तरमुत्तरं लिखत।**

(1) अतिपरिचयात् कः आशयः?

(2) सूचीमुखन्यायेन किमुपदिष्टम्?

(3) तक्रकौण्डिन्यन्यायस्य सोदाहरणं प्रतिपादनं कुरुत।

(4) मलिनदर्पणन्यायं विवेचयत।

**5. प्रदत्तसूचनानुसारं कुरुत।**

**(क) विभक्तिपरिचयो देयः।**

(1) अतिपरिचयात् (2) ब्राह्मणेभ्यः (3) दर्पणे (4) मूर्खाणाम् (5) उपदेशः

**(ख) सन्धिविच्छेदं कुरुत।**

(1) तस्मादेव (2) वस्तुतस्तु (3) मणिश्चायम् (4) अप्यस्ति (5) कणिकापि

**(ग) सन्धिं कुरुत।**

(1) जगत् + अस्ति

(2) तत् + ज्ञः

(3) शान्त + आत्मा

(4) कल्पितः + अयम्

(5) कस्माद् + अवस्था

**(घ) धातुपरिचयो देयः**

(1) जायते (2) आदिश्यते (3) बोधयति (4) निमीलति (5) जागर्ति

**छात्रप्रवृत्तिः**

– छात्राः न्यायप्रतिपादकानां सूक्तिश्लोकानां सङ्ग्रहं कुर्युः।

– छात्रमण्डलं निर्माय वर्गखण्डे लौकिकन्यायानां सचित्रं प्रदर्शनं करणीयम्।

– यथावसरं स्ववक्तव्ये लौकिकन्यायाः उदाहर्तव्याः।

**अध्यापकप्रवृत्तिः**

– शिक्षकः पाठेतरलौकिकन्यायान् अपि बोधयेत्।

– लौकिकन्यायसन्दर्भीणि सुभाषितान्यपि ज्ञापयेत्।

●

(१७)

# छन्दांसि

**प्रस्तावना**

''छन्दः पादौ तु वेदस्य'' इति स्मृतिवाक्यानुसारेण छन्दांसि वेदपुरुषस्य पादौ स्तः। छन्दःशास्त्रस्य रचयिता आचार्यः पिङ्गलोऽस्ति। छन्दोज्ञानसारल्यार्थं श्रीमता केदारभट्टेन ''वृत्तरत्नाकरः'' इति ग्रन्थः रचितः।

संस्कृते गद्यं पद्यं च काव्यस्य प्रकारद्वयम् अस्ति। गद्यमयकाव्यस्य पठनं भवति किन्तु पद्यमयकाव्यस्य गानं भवति। गानेन वातावरणम् आनन्दयुक्तं मनोहारि, सौहार्दपूर्णं च भवति। गानं तु आबालवृद्धेभ्यः रोचते। गानेन न तु केवलं मानवाः किन्तु देवाः अपि तुष्यन्ति। किन्तु गानं तदैव सुंदरं भवति यदा छन्दसां ज्ञानं स्यात्।

छन्दोज्ञानेन श्लोकानां शुद्धिरपि भवति, तस्मात् छन्दो। ज्ञानमतीवावश्यकम्। तेनैव वयमघ छन्दसाम् अभ्यासं करिष्यामः॥

**छन्दोभेदाः**

पिङ्गलादिभिः आचार्यैः कथितं यत् छन्दोज्ञाने मात्राज्ञानम् अतीव आवश्याकम् अस्ति।

**पिङ्गलादिभिराचार्यै-**
**र्यदुक्तं लौकिकं द्विधा।**
**मात्रावर्णविभागेन**
**छन्दस्तदिह कथ्यते॥**

छन्दसः मात्राछन्दः वर्णछन्दश्चेति द्वौ भेदौ स्तः। तयोः येषां छन्दसां रचनायां मात्रायाः गणना भवति तत् मात्राछन्दः कथ्यते यथा- आर्या गीतिः पथ्यादि। येषां छन्दसां रचनायां वर्णमहत्त्वं भवति तत् वर्णछन्दः कथ्यते यथा- शिखरिणी, पृथ्वी, मालिन्यादि।

यद्यपि नवम्यांकक्षायाम् अस्माभिः पठितम् तथापि पुनः स्मृत्यै अत्र मात्रा विषये पठामः।

**मात्राज्ञानम्:**

**मात्रा अर्थात् उच्चारणकालः।**

**एकमात्रो भवेद् ह्रस्वो**
**द्विमात्रो दीर्घ उच्यते।**
**त्रिमात्रस्तु प्लुतो ज्ञेयो**
**व्यञ्जनं चार्धमात्रिकम्॥**

**भावार्थः** -एकमात्रायुक्तः यथा अ, इ, उ, ऋ युक्तः वर्णः ह्रस्वः भवति। द्विमात्रायुक्तो वर्णः अर्थात् आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ, अं, अः इत्यादिः दीर्घः भवति। तिसृभिः मात्राभिः युक्तोवर्णः प्लुतः भवति। तस्य मात्राः तिस्रः भवन्ति।

स्वरहीनव्यञ्जनम् अर्धमात्रिकं भवति। किन्तु वृत्ते तस्य गणना न भवति।

**लघुगुरुसंज्ञा:**

**सानुस्वारो विसर्गान्तो**
**दीर्घोयुक्तः परश्च यत्।**
**वा पादान्ते त्वसौ वक्रो**
**ज्ञेयोऽन्यो मात्रिको लृजुः॥**

अर्थात् - अनुस्वारयुक्तो वर्णः, विसंगयुक्तो वर्णः, दीर्धवर्णः, तथा परः अर्धव्यञ्जनयुक्तोवर्णः यः भवति तस्याग्रिमो वर्णः दीर्घः वा गुरुः कथ्यते। ह्रस्ववर्णः लघुः उच्यते। पादान्तवर्णः विकल्पेन गुरुः लघुर्वा कथ्यते।

लघोः मात्राचिह्नं। भवति तथा गुरोः ऽ चिह्नं भवति।

**गणपरिचयः -**

गणपरिचयसूत्रमिदं परमावश्यकम्-

**यमाताराजभानसलगम्।**

यथा अङ्कशास्त्रम् एकतः दशाङ्के सुबद्धं तथैव छन्दश्शास्त्रमपि दशगणसूत्रेऽस्मिन्निबद्धमस्ति। सूत्रेऽस्मिन् प्रत्येकंवर्णः गणरूपोऽस्ति। त्र्यक्षराणां समूहः गण इति कथ्यते। यथा-

यगणे त्रीणि अक्षराणि भविष्यन्ति- यमाता, प्रथमः लघुः द्वितीयः गुरुः तृतीयोऽपि गुरुः इत्यनुसारं सर्वत्र। तदर्थं श्लोकोऽपि अभिहितः।

**मस्त्रिगुरुस्त्रिलघुश्च नकारो**
**भादिगुरुः पुनरादिलघुर्यः।**
**जो गुरुमध्यगतो रलमध्यः**
**सोऽन्तगुरुः कथितोऽन्तलघुस्तः॥**

| क्रमः | गणनामानि | गणाक्षराणि | चिह्नानि |
|---|---|---|---|
| 1. | यगणः | यमाता | । ऽ ऽ |
| 2. | मगणः | मातारा | ऽ ऽ ऽ |
| 3. | तगणः | ताराज | ऽ ऽ । |
| 4. | रगणः | राजभा | ऽ । ऽ |
| 5. | जगणः | जभान | । ऽ । |
| 6. | भगणः | भानस | ऽ । । |
| 7. | नगणः | नसल | । । । |
| 8. | सगणः | सलगम् | । । ऽ |
| 9. | लघुः | लघुः | । |
| 10. | गुरुः | गुरुः | ऽ |

**अनेन कोष्ठकेन दशगणानां ज्ञानं भवति।**

**1. मात्राछन्दः आर्याछन्दः**

**लक्षणम्** - यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि। अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या॥

**अन्वयः**- यस्याः प्रथमे पादे द्वादशमात्राः तथा तृतीये पादे अपि द्वादशमात्राः, द्वितीये अष्टादशमात्राः, चतुर्थके पञ्चदशमात्राः, सार्या।

**भावार्थः**- यस्य छन्दसः प्रथमे पादे द्वादशमात्राः, तथा तृतीये पादे अपि द्वादशमात्राः भवन्ति। द्वितीये अष्टादशमात्राः भवन्ति तथा चतुर्थके पञ्चदशमात्राः भवन्ति, तच्छन्द आर्या इति कथ्यते।

**उदाहरणम्**

**आपरितोषाद् विदुषां, न साधु मन्ये प्रयोगविज्ञानम्।**

**बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥ अभि. शा. ॥2॥**

2. **वर्ण छन्दः**

**भुजङ्गप्रयातम्**

**लक्षणम्** - भुजङ्गप्रयातं चतुर्भिर्यकरैः।

**भावार्थः** - यस्मिन् छन्दसि क्रमशः चत्वारः यगणाः भवन्ति तच्छन्दः भुजङ्गप्रयातम् कथ्यते।

**उदाहरणम्:**

**न तातो न माता न बन्धुर्न दाता।**

**न पुत्रो न पुत्री न भृत्यो न भर्ता।**

**न जाया न विद्या न वृत्तिर्ममैव**

**गतिस्त्वं गतिस्त्वं त्वमेका भवानि॥ भवान्यष्टकम्।**

3. **दधिक छन्दः**

**लक्षणम्** - दोधकमिच्छति भत्रितयाद् गौ।

**भावार्थः**- यस्मिन् छन्दसि क्रमशः त्रयः भगणाः तदन्ते द्वौ गुरू भवतः तच्छन्दः दोधकं कथ्यते।

**उदाहरणम्**

**ह्रीमति मन्त्रजपेन सुगम्ये हेमलतोज्वलदिव्यशरीरे।**

**योगिमनः समशीतजलेन ह्याचमनं त्रिपुरेशि गृहाण॥ देवीराजोपचारः**

4. **शिखरिणी**

**लक्षणम्** - रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी।

**भावार्थः** - यस्मिन् छन्दसि क्रमशः यगणः, मगणः, नगणः, सगणः, भगणः, तथान्ते लघुः एवं गुरुः स्यात्तदा तच्छन्दः शिखरिणी कथ्यते। अस्मिन् छन्दसि षष्ठस्य अक्षरस्यान्ते एकादशाक्षरान्ते च यतिः (विरामः) आगच्छति।

**उदाहरणम्**

**महिम्नः पारं ते परमविदुषो यद्यसदृशी**

**स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्तवयि गिरः।**

**अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्**

**ममाप्येषस्तोत्रे हरनिरपवादः परिकरः॥ महिम्नः स्तोत्रम्।**

5. **मन्दाक्रान्ता छन्दः**

**लक्षणम्** - मन्दाक्रान्ताम्बुधिरसनगामो भनौ तौ गयुग्मम्।

**भावार्थः** - यस्मिन् छन्दसि क्रमशः मगणः, भगणः द्वौ तगणौ, अन्ते च द्वौ गुरू भवतः तच्छन्दः मन्दाक्रान्ता कथ्यते।

**उदाहरणम्**

**कश्चित्कान्ता विरहगुरुणा स्वाधिकारात्प्रमत्तः**

**शापेनास्तङ्गमितमहिमा वर्षभाग्येणभर्तुः।**

**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु**

**स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥ (मेघदूतम् - 1)**

## स्वाध्यायः

**1. कोष्टकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) छन्द ........ पादौ। (वेदस्य, पुराणस्य, देवस्य)

(2) ''वृत्तरत्नाकर'' इति ग्रन्थः ........ रचितः। (व्यासेन, कालिदासेन, केदारभट्टेन)

(3) छन्दः शास्त्रस्य रचयिता आचार्यः ........ अस्ति। (भरतः, पिङ्गलः, वाल्मीकिः)

(4) मात्रा अर्थात् ........ कालः। (चिन्तनकालः, उच्चारणकालः, उद्यमकालः)

(5) छन्दस्सु ........ भेदाः। (चत्वारः, द्वौ, त्रयः)

(6) गुरोः मात्राचिह्नं ........ भवति। (5, 0, 1)

(7) मगणे ......... भवति। (त्रिगुरु, त्रिलघु, एकगुरुः)

(8) ........ आदिगुरुः भवति। (भगणे, मगणे, नगणे)

**2. एकैकवाक्येन उत्तरं यच्छत।**

(1) छन्दश्शास्त्रं कस्मिन् सूत्रे निबद्धमस्ति?

(2) गणसूत्रे कति गणाः भवन्ति?

(3) कतिनाम् अक्षराणां समूहः गण इति कथ्यते?

(4) स्वरहीनव्यञ्जनं कतिमात्रिकं भवति?

(5) केषां छन्दसां रचनायां वर्णगणना भवति?

**3. पञ्चवाक्यैः प्रश्नानाम् उत्तराणि लिखत :**

(1) शिखरिणीलक्षणं किम्?

(2) मन्दाक्रान्तायाः किं लक्षणम्?

(3) भुजङ्गप्रयातस्य छन्दसः लक्षणोदाहरणे लिखत?

(4) दोधकं छन्दः सोदाहरणं लिखत?

**4. सविस्तरमुत्तरं लिखत।**

**(क) विभक्तिपरिचयो देयः।**

यकरैः, यस्याः, छन्दसि, गणेषु, गौ

**(ख) धातुपरिचयो देयः।**

इच्छति, भवति, कथ्यते, आगच्छन्ति, स्तः, भवन्ति।

**(ग) संधिविग्रहं कुरुत।**

सार्या, चतुर्भिर्यकरैः, सोदाहरणम्, सोऽन्तगुरु, भादि।

**छात्रप्रवृत्तिः**

अन्यवृत्तानां गानं कुर्युः।

**अध्यापकप्रवृत्तिः**

अन्यानि छन्दांसि छात्रान् लयबद्धतया श्रावयतु।

# (१८)

# पत्रलेखनम्

**प्रस्तावना**

मानवा: स्वचेतसि विद्यमानानां विचाराणां भावानाञ्च अभिव्यक्तिं विविधमाध्यमै: कुर्वन्ति। मनुष्या: भावविचारविनिमयं विना जीवितुं न पारयन्ति। समीपतरवर्तिभि: साकं सम्भाषणद्वारा विचारविनिमय: क्रियते परं दूरस्थै: आत्मीयै: साकं भावानां विचाराणाञ्च विनिमयार्थं पत्रमेकं अल्पव्ययसाध्यम् अपूर्वं च साधनमस्ति।

सत्सु अपि दूरभाषादीतरसम्पर्कमाध्यमेषु पत्रलेखनस्य महत्त्वं न्यूनं नास्ति। पत्रलेखनम् एका कला अस्ति। विचाराणां तार्किक-उचित-क्रमबद्धविन्यास:, हृदयङ्गमा भाषा, तत्तद्विशिष्टगुणाश्च पत्रलेखने गुणवत्तातिशयम् आवहन्ति। ईदृशपत्रलेखनमाध्यमेन सामाजिकसम्बन्धेषु अपि सौमनस्यं वर्धते। विविधा: सार्वकारिका: व्यावसायिका: वाणिज्यादयो व्यवहाराश्च साम्प्रतं पत्रलेखनमाध्यमेनैव निवर्त्यन्ते। अत: पत्रलेखनस्य बहु महत्त्वमाकलय्य पाठेऽस्मिन् छात्राणां पत्रलेखनज्ञानसम्पादनार्थं पत्रलेखनपद्धति: निदर्शनरूपेण कानिचन पत्राणि चात्र समुपस्थाप्यन्ते।

**पत्रलेखनस्य सामान्यनियमा:**

- पत्रस्य भाषा सरला, शिष्टा, हृदयङ्गमा च स्यात्।
- पत्रस्य मुख्य: आशय: संक्षिप्तरूपेण स्पष्टरूपेण च प्रतिपादनीय:।
- अनुचितविषयान्तरं सर्वथा परित्यक्तव्यम्।
- अक्षराणि सुवाच्यानि, पंक्तयश्च उचितावकाशस्थिता: स्यु:।
- प्रेषयितु: स्वीकर्त्तुश्च नामस्थानादिकं स्पष्टरूपेण यथास्थानम् उल्लेखनीयम्।

**पत्रस्य प्रकारा:**

- **पत्रलेखनस्य प्रकारद्वयं विद्यते।**

1. **औपचारिकपत्राणि**
2. **अनौपचारिकपत्राणि**

तत्र कार्यालयीयपत्राणि व्यावसायिकपत्राणि च औपचारिकपत्राणि, एवं व्यक्तिगतपत्राणि अनौपचारिकपत्राणि उच्यन्ते।

**पत्रलेखनक्रम:**

- **यद्यपि पत्रलेखने विविधा: पद्धतय: दृश्यन्ते, किन्तु पत्रलेखने सामान्यतया एष: क्रम: समाद्रियते-**

1. **शीर्षिका :**
   - पत्रप्रारम्भे सर्वादो "श्री:", "मात्रे नम:", "कुलदेवतायै: नम:" इत्यादीनि तत्तत्समाजपरम्परानुसारीणि माङ्गल्यवचांसि लिख्यन्ते। परम् औपचारिकपत्रेषु एतत् परिहर्तव्यम्।
   - पत्रस्य दक्षिणकोणे यस्मात् स्थानात् पत्रं लिख्यते, तत्स्थानं दिनांकश्च लिख्यते। औपचारिकपत्रेषु केचन स्वनामपुर:सरं सङ्केत: (address), हस्ताक्षरम् इत्यादिकं च लिखन्ति।
2. **सम्बोधनम् :**
   - शीर्षिकां परिसमाप्य उचितावकाशं परित्यज्य पत्रस्य वामकोणे पत्रस्वीकर्तु: वयोऽनुगुणम्, सम्बन्धानुगुणम्, स्थानानुगुणं च सम्बोधनं लेखनीयम्। यथा-

- पितुः कृते - पूज्याः पितृचरणाः !, श्रद्धेयाः तातपादाः!
- मित्रस्य कृते - प्रिय मित्र!, सुहृन्मणे!, प्रिय वयस्य!
- ज्येष्ठजनानां कृते - मान्याः !, आदरणीयाः !, परमपूज्याः!, सम्माननीयाः!
- कनिष्ठवयसां कृते - वत्स !, प्रिय ! प्रिय! चिरञ्जीविन्!
- सम्बोधनान्तरं वैयक्तिकपत्रेषु नमस्कारवाक्यम्, कुशलनिवेदनप्रश्नवाक्यानि च लिख्यन्ते।
- औपचारिकपत्रेषु सम्बोधनान्तरं संक्षेपेण पत्रस्य मुख्यविषयोऽपि लिख्यते। यथा-विषयः- ''अवकाशप्राप्त्यर्थम्'' इत्यादि।
- औपचारिकपत्रेषु च सम्बोधनादधः पत्रस्वीकर्तुः कार्यस्थानं च लिख्यते।

**3. विषयः**

- पत्र द्वारा यत्सूचनीयमस्ति तदत्र सारगर्भितवाक्यैः भावस्पष्टतापूर्वकं लेखनीयम्।
- विषयभेदे च पृथगनुच्छेदः प्रकल्पनीयः।

**4. समाप्तिः**

- मुख्यविषयवस्तुनः उपसंहृतेः पश्चात् सम्बन्धानुगुणम्, इतिशब्दोत्तरम् यथा-
- इति भवतां पुत्रः
- इति भवतां विधेयः छात्रः
- निवेदकः

इत्यादि विलिख्य तदधः स्वनाम लेखनीयम्।

**5. हस्ताक्षरम् :**

- ''इति भवदीयः'' इत्यादेः पश्चात् पत्रलेखकस्य हस्ताक्षरं भवति।
- औपचारिकपत्रेषु कैश्चित् हस्ताङ्कनकर्तुः नामस्थानादिनिर्देशः लिख्यते।

**6. संकेतः :**

- पूर्वोक्तान् सर्वान् क्रमान् समाप्य पत्रस्वीकर्तुः संकेतः (address) स्पष्टतया लेखनीयः।
- पत्रालयनाम (post office), जनपदनाम (district), राज्यनाम (state), पत्रालयस्थानसङ्ख्या (pincode) एते अंशाः अपि लेखनीयाः।
- अतिपरिचिताय यदानीं पत्रं लिख्यते तदा लेखकस्य सङ्केतः (address) नावश्यकः।
- साम्प्रतं प्रेषयितुः स्वीकर्तुश्च सङ्केतादिकं पत्रवेष्टनस्य (cover) उपरि लिखन्ति।
- अधुना पत्रलेखनस्य उदाहरणानि प्रस्तूयन्ते-

**1. विद्यालये प्रवेशं प्राप्तुं प्रधानाचार्यं प्रति आवेदनपत्रम्।**

**भारवि भट्टः**
**सुन्दरनगरम्, कृपावीधिः,**
**कर्णावती-380058**
**दिनाङ्कः - 07-08-2018**

**माननीयाः प्रधानाचार्याः**
**श्रीसारस्वतविद्यालयः**
**देवभूमिः द्वारिका**

**विषयः : भवदीयविद्यालये प्रवेशप्राप्त्यर्थम्**

**महोदयाः!**

सादरं विनिवेद्यते यत् - मम पितुः सर्वकारिव्यवस्थाप्रबन्धकत्वेन नियुक्तिः द्वारिकायां सञ्जातास्ति। अतोऽस्माभिः सपरिवारं तत्र वास्तव्यं भविष्यति। अहं भवतां विद्यालये प्रवेशं वाञ्छामि। भवद्भ्यः अनुरोधोऽस्ति यन्मह्यं भवदीयाविद्यालये

नवम्यांकक्षायां प्रवेशस्य अनुमतिं यच्छन्तु इति। एतेन पत्रेण साकं प्रवेशप्राप्त्यर्थम् आवश्यकानि प्रमाणपत्राणि अपि संलग्नानि सन्ति।

**निवेदकः**

**भारवि भट्टः**

**सकाशात् ( from )**

________________

________________

________________

**सविधे( to )**

________________

________________

________________

**2. मित्रं प्रति अभिनन्दनपत्रम्।**

**जामखम्भाळिया**

**देवभूमि-द्वारिका - 361335**

**दिनाङ्कः - 29-7-2019**

**प्रियसुहृन्मणे! हार्दिक!**

अत्राहं कुशली अस्मि। भवान् कुशली? इति प्रष्टव्यमेव नास्ति। यतो हि नेटपरीक्षायाम् उत्तीर्णो भूत्वा कः कुशली न स्यात्?

इदानीमेव तवास्याः सफलतायाः शुभसन्देशः प्राप्तः। तुभ्यं नैकानि अभिनन्दनानि। एवमेव प्रगतिपरायणो भूत्वा यथाभिलषितं प्राप्नुयाः, इति भगवन्तं द्वारिकाधीशं प्रार्थये। पुनश्च तुभ्यम् -

**सप्रेमभावामृतशोभनानि**
**मित्राधिकस्नेहविनिर्गतानि**
**वयस्य! ते हर्षविवर्धनानि**
**भूयांसि भूयांस्यभिनन्दनानि॥**

**इति भवदीयः सुहृद**

**श्री हर्षवर्धनः उपाध्यायः**

**3. भगिन्याः विवाहार्थं दिनत्रयस्य अवकाशप्राप्त्यर्थं प्रधानाचार्यं प्रति प्रार्थनापत्रम् :-**

**मान्याः श्रीमन्तः प्रधानाचार्याः**

**ज्ञानसागरमहाविद्यालयः**

**विलासपुरम् - 36**

**विषयः - अवकाशप्राप्त्यर्थम्**

मान्याः!

सप्रश्रयं विनिवेद्यते यत् - आगामिनः जनवरीमासस्य तृतीये दिनाङ्के मम ज्येष्ठभगिन्याः विवाहप्रसङ्गः निर्धारितोऽस्ति। विवाहे सहभागितां दातुं कार्यभारं च वोढुं तत्र ममोपस्थितिः अनिवार्या अस्ति। अतः मह्यं द्वितीयदिनाङ्कात् चतुर्थदिनाङ्कं यावत् दिनत्रयस्य अवकाशं ददतु इति नम्रं निवेदनम्।

**भवतां विधेयः छात्रः**

**कुसुमाकरः दवे**

**कक्षा- नवमी ( ब-विभाग )**

**उपस्थितिक्रमाङ्कः - 18**

**4. सरस्वतीमहोत्सवं वर्णयत् सखीं प्रति पत्रम्।**

**रामनगरम्**
**जानकीपुरम्**
**दिनाङ्कः - 12-10-19**

**प्रियसखि! प्रियम्वदे!**

अहमत्र कुशलिनी अस्मि। भवत्याः पत्रं प्राप्तम्। परं प्रतिपत्रं लिखितुं नापारयम्। यतो हि अहं सरस्वतीमहोत्सवे व्यस्ता आसम्। अस्माकं विद्यालये प्रतिवर्षवत् ऐषमः अपि आश्विनमासस्य शुक्लपक्षस्य सप्तमीतः नवमीं यावत् त्रिदिनात्मकः सरस्वतीमहोत्सवः आसीत्। तत्र प्रथमे दिवसे मूलनक्षत्रे सरस्वतीप्रतिमायाः पुरतः विविधानि ग्रन्थरत्नानि समुपस्थाप्य भगवत्यावाहनप्रतिष्ठापूजनादिकं सश्रद्धमस्माभिर्विहितम्। द्वितीये दिने विविधस्तोत्राणां पाठः, जपानुष्ठानं तृतीये विसर्जनं च विहितम्। दिनत्रयेऽपि अनध्यायः आसीत्। अस्माभिश्चायं महोत्सवः सोल्लासं समनुष्ठितः। भवती अपि एकवारम् अस्माद्विद्यालयमागत्य अस्य महोत्सवस्य लाभं गृह्णातु। अन्यः कश्चन विशेषः नास्ति। पत्रं लिखतु।

**इति भवदीया प्रियसखी**
**देवांशी**

**5. प्रधानाचार्यस्य छात्रस्य प्रगतिं वर्णयत् पितरं प्रति पत्रम्।**

**ऋतराजमहाविद्यालयः**
**आरामनगरम्**
**कर्णावती**
**दिनाङ्कः - 02-02-2018**

**श्रीमन्! सुधाकरमहोदय!**
**ग्रामः :- ग्रामपत्रालयः - राजद्वारम्**
**जनपदम् - कृष्णाश्रयः**

आशासे भवत्परिवारस्य सर्वेऽपि सदस्याः स्युः। अत्रापि सर्वं मङ्गलं विलसति।

विज्ञापनीयमस्ति यत् भवतां सुपुत्रः चि. महिमः अस्माकं विद्यालयस्य प्रतिभाशाली छात्रः अस्ति। गतायां षाण्मासिकपरीक्षायामपि स एव कक्षायां प्रथमस्थानमलभत। अध्ययनेन साकं भवत्पुत्रे शिष्टता, नम्रता, अनुशासनम् इत्यादि - गुणा अपि सन्ति। वयं तस्य उज्जवलं भविष्यं कामयामहे। इतोऽपि तेन बहु-अग्रे गन्तव्यमस्ति। भवन्तोऽपि यथाकालं तस्य मार्गदर्शनं कुर्युः।

**शुभेच्छकः**
**प्रधानाचार्यः**
**ऋतुराजमहाविद्यालयः,**
**कर्णावती**

**छात्रप्रवृत्तिः**

छात्राः यथासमयं पत्रलेखनेन सामाजिकसम्बन्धेषु मिथः सौमनस्यं वर्धयेयुः।

**शिक्षकप्रवृत्तिः**

शिक्षकः विविधविभागेषु पत्रलेखनार्थं छात्रान् प्रेरयेत्।

● ● ●